भारतीय-स्वतन्त्रता-संघर्ष-गाथा



उत्तर प्रदेश संस्कृत संस्थान
लखनऊ

भारतीय-
स्वतन्त्रता-संघर्ष-गाथा

डॉ. सत्यदेवः चौधरी

उत्तर प्रदेश संस्कृत संस्थान
लखनऊ

प्रकाशक :
श्रीमती अलका श्रीवास्तव
निदेशक :
उत्तर प्रदेश संस्कृत संस्थान, लखनऊ

प्राप्ति-स्थान :
विक्रय-विभाग :
उत्तर प्रदेश संस्कृत संस्थान, नया हैदराबाद,
लखनऊ–२२६ ००७

प्रथम संस्करण :
वि.सं. २०५५ (१९९८ ई.)
प्रतियाँ : १०००
मूल्य : रु. ४०/– (चालीस रुपये)
© उत्तर प्रदेश संस्कृत संस्थान, लखनऊ

मुद्रक : **शिवम् आर्ट्स**, २११, निशातगंज लखनऊ । दूरभाष : ३८६३८९

आत्मकथ्यम्

स्वतन्त्रतायाः स्वर्णजयन्तीवर्षे अस्माकं बालपाठकाः स्वतन्त्रताम् अधिगन्तुं कृतेन संघर्षेण स्वातन्त्र्य-वीराणां शौर्यपूर्णैः चरितैः तेषां बलिदानैः त्यागैश्च परिचयं प्राप्नुयुः इति मनसि निधाय विगतशतवर्षाणाम् अतिविस्तारमयम् अपि वृत्तं संक्षिप्य सुबोधया संस्कृतगिरा प्रस्तुवन् हर्षम् अनुभवामि, कामये च अस्यानुशीलनेन प्रेरणां गृहीत्वा राष्ट्राभ्युदयाय तत्परा भवेयुरिति।

जयतु जयतु मे भारतराष्ट्रं,
सकल-सुधीजन-वन्द्यं।
नन्दतु विलसतु भूरि-विभूत्या
भातु जगत्यभिनन्द्यम्।।

१५ अगस्त-मासः, १९९८

सत्यदेवः चौधरी

भारतीय-
स्वतन्त्रता-संघर्ष-गाथा

[१]

भारतवर्षे मुग़ल-सम्राट्-औरंगज़ेबस्य शासनकाल: १६५८-१७०७ ईसवीय-वर्षाणाम् आसीत्। तस्य मृत्यो: अनन्तरं उत्तराधिकारिणां भीरुताया: स्वेच्छा-चारितायाश्च प्रभावेण आडम्बरमय-विलासपूर्ण-जीवन-शैली-हेतो: भारतदेश: अराजकता-ग्रस्त: जात:। नादिरशाहस्य (१७३९ ई०), अहमदशाह अब्दाली (१७६१ ई०)-इत्यस्य च आक्रमणेन, मराठानां सिक्खानां च उत्तरोत्तरं वर्धमानया शक्त्या एतस्य साम्राज्यस्य मूलभित्ति: कम्पिता इव अजायत। परिणामत:, देशस्य विभिन्न-प्रदेशानां विशेषत: अवध-बंगाल-हैदराबाद-कर्णाटक-प्रदेशानाम् अधिपतय: मुग़ल-साम्राज्यस्य विरोधिन: संजाता:।

एतादृशीं राजनैतिकीं दु:स्थितिम् अनुभूय भारतदेशे पूर्वम् आगता: विदेशि-व्यापार-कम्पन्य:—विशेषत: आंग्ल-फ्रांसीय-कम्पन्यौ व्यापारिकं समुद्देश्यं विस्मृत्य भारते शासनस्य स्वप्नम् अवलोकितवत्यौ। राजनैतिक-शक्त्या: अधिगमाय एते कूटनीतिम् अवलम्ब्य भारतीयानां राज्ञां च पारस्परिक-कलहेषु साहाय्यं कर्तुम् आरभेताम्। बहुसंघर्षानन्तरम् आंग्ल-कम्पनी भारते राज्य-स्थापने सफला जाता। लार्डक्लाइवत:



(ज़फ़र-उपनामा बहादुरशाह:)

आरभ्य लार्ड-डलहौजी-पर्यन्तं सप्तदशभि: आंग्ल-शासकै: पूर्वीय-भारते शासनम् अक्रियत। एतदन्तराले सिक्ख-शासका: मराठा-शासका: टीपू-सुलतानादिकाश्च आंग्लानां घोर-विरोधिन: जाता:, परम् आंग्लानां प्रभुता साम्राज्य-सीमा च इत्थम् अवर्धत यद् लार्ड-डलहौज़ी इत्यस्य आतंकेन मुग़लवंशस्य नाममात्रेण: सम्राट् **जफ़र-उपनामा-बहादुरशाह:** लालकिला-नामकं दुर्गं त्यक्तुं विवश: अभवत्। एवं मुगल-साम्राज्यस्य अन्तिम: दीपक: निर्वाण: जात:।

न केवलम् इदम् एव अपितु आंग्ल-शासका: कूटनीतिम् आश्रित्य भारतीय-संस्कृतौ प्रहर्तुम् आरभन्त। परिणामत:, बुद्धिजीविनां भारतीयानाम् एव प्रयासेन भारतीय-जनता आंग्लभाषां आंग्ल-जीवन-शैलीं प्रति च समाकृष्टा भूत्वा तस्याम् अनुरागं बबन्ध। अन्तत:, आंग्लभाषा शिक्षाया माध्यमं जाता।

परम् आंग्ल-शासकानाम् एतादृशै: कूटनीति-जालै: प्रतिबुद्धानां भारतीयानां हृदये तान् प्रति अविश्वास-रोष-क्षोभ-घृणा- भावना- जनित: विद्रोहानल: शनै: शनै: ज्वलितुम् आरेभे। अस्य विद्रोहानलस्य **अतिभीषण: विस्फोट: १८५७तमेसवीये वर्षे** भारतीय-क्रान्ति-रूपेण समजायत। एष विद्रोह: प्रथम-स्वातन्त्र्य-संग्राम-नाम्ना स्मर्यते।

[२]

पूर्वोक्तं विद्रोहम् अभिलक्ष्य आंग्ल-शासकै: दमनचक्रं पूर्वतोऽप्यधिकं कठोरं कृतम्। सत्यम् एतद् यद् भारतीय-जनताया: हृदयं विजेतुं तै: अनेकानि प्रगतिशीलानि कर्माणि सम्पादितानि। यथा जलापूर्तिव्यवस्था, सुदीर्घ-वितत-मार्ग-निर्माणम्, रेल-आदि-यातायात-साधनानां बाहुल्यम्, शिक्षाभिवृद्धि: स्वच्छतायै प्रयासा: आदि। परम् एतेषां सुकार्याणां लक्ष्यमासीत् स्वशासनस्य दृढ़ीकरणम्। एतदर्थं तै: भारतीय-सेनामध्ये योरोपीय-सैनिकानां संख्यानुपात:, तेषां वर्चस्वं च शनै: शनै: अधिकाधिकं विहितम्। भारतीय-सैनिका: अपि प्रवरावरेषु वर्गेषु विभाजिता अभवन्, येन ते सदा हीनोन्नत-भावना-ग्रस्ता: आंग्ल-शासकान् प्रति विद्रोहाय परस्परं संघटिता न भवेयु:। न केवलं सेनासु

अपितु सर्वासु राजकीय-सेवासु भारतीयाः कर्मचारिणः आंग्लाधिकारि-वर्गापेक्षया अवर-श्रेण्याम् एव स्थापिताः।

१८५७तमेसवीयस्य वर्षस्य विद्रोह-काले 'रजवाड़ा-इत्याख्यैः लघुराज्यैः आंग्ल-शासकानां साहाय्यम् आचरितम्। इतः पूर्वम् आंग्ल-शासकाः एतानि राज्यानि विजेतुं दृढं कामयन्ते स्म, परम् एतदनन्तरं तैः निश्चितम् यत् सर्वाणि रजवाड़ाऽऽख्य-राज्यानि स्वाधीनानि एव स्थास्यन्ति।

आंग्ल-शासकैः हिन्दू-मुस्लिम-जात्योः परस्परं भेद-भावनां जनयितुम् अनेके उपायाः कृताः। आंग्ल-शिक्षायाः प्रचार-प्रसारार्थं तैः अनेके विश्वविद्यालयाः संस्थापिताः। परिणामतः, तत्र आंग्ल-वातावरणे शिक्षिताः युवानः सामान्य-जनतां हीनां मत्वा ताम् अवहेलयन्ति स्म।

नास्ति सन्देहः यद् भारते एभिः शासकैः औद्योगिक-विकासः प्रकामं विहितः। परम् एतेन भारतीयाः वर्ग-द्वये विभक्ताः जाताः- (१) समृद्धवर्गः (पूंजीपति वर्गः), (२) श्रमिकवर्गश्च। ईदृशी भेदनीतिः एभिः शासकैः स्व-शासनस्य पुष्टये सर्वेषु क्षेत्रेषु प्रचालिता आसीत्।

आंग्लैः भारतस्य अर्थव्यवस्थां जर्जरीकर्तुम् अपि प्रयासाः कृताः। यद्वशात् सामान्य-जनता अनुदिनं कृशधनतां गच्छति स्म। देशस्य अनेके भूभागाः १८९६-१९००तमेसवीय-वर्षेषु असकृत् दुर्भिक्षाक्रान्ताः जाताः। परिणामतः, प्रायः लक्षाणि जनाः काल-कवलिताः अभूवन्। अन्नादीनाम् अभावात् कुपोषणात् च सामान्याः जनाः रुजाक्रान्ताः भूत्वा क्षीणतां ययुः।

आंग्लानां दुरभिसन्धिना प्रेरितैः भूस्वामिभिः, रजवाड़ा-शासकैः, आरक्षि-दलैः (पुलिस-दलैः), कुसीद-जीविभिः व्यापारि-वर्गेण च सामान्य-जनतायाः भूयोभूयः शोषणं कृतम्। आंग्ल-शासनम् अन्याय-कर्तृणाम् एषां पृष्ठपोषकम् आसीत्। न केवलम् इदमेव, अपितु शासनेन कृषकवर्गः असह्य-भूमिकर-भारेण अत्यर्थं सम्पीडितः अपि। ईदृशैः भ्रष्टैः उपायैः संगृहीतायाः सम्पदः स्वदेशे प्रेषणम् अपि आंग्लैः आरब्धम्। एवम् अस्माकं मृषाहितैषिणः शासकाः भारतं समग्रतः अलुण्ठन्। तेषाम् आंग्ल-देशश्च भारतीय-सम्पदा परां पुष्टिं प्रयाति स्म।

भारतीयानां शिक्षितवर्गः विदेशिनां कूटनीतेः दुष्प्रभावान् विलोक्य सचिन्तः अजायत। विदेशि-शासकाश्च स्पष्टम् उद्घोषयन् यद् शिक्षिताः अपि भारतीयाः स्व-शासनस्य संचालने नितान्तम् अयोग्याः असमर्थाश्च सन्ति।

व्यापारि-वर्गोऽपि अजानात् यत् विविधैः शुल्कैः, कराणां वृद्ध्या, यातायात-विषयक-नीति-व्याजेन विदेशि-शासनं व्यापार-क्षेत्रे उत्तरोत्तरं बाधाः उपस्थापयितुं चेष्टते। एवं शिक्षिताः युवानः व्यापारिणश्च आंग्ल-शासनस्य विरोधिनः जाताः। सर्वेऽपि भारतीयाः सामान्य-विदेशि-जनापेक्षया हीनतरा अवलोक्यन्ते स्म। कृतापराधः अपि आंग्लः न्यायालयेषु अदण्ड्यः जायते स्म। रेलयात्रायां यस्मिन् कक्षे आंग्लाः यात्रिणः भवन्ति स्म, तत्र भारतीया यात्रिणः प्रवेशं न लभन्ते स्म। एतया भेद-भावनया सर्वेषु क्षेत्रेषु जनाः आंग्ल-शासनं प्रति असन्तुष्टाः रुष्टाश्च अजायन्त।

[३]

१८५७तमेसवीये वर्षे सैनिकैः कृत-विरोधात् पश्चात् ब्रिटिश-सर्वकारेण प्रतिशोध-कामनया यानि नृशंसता-पूर्णानि कार्याणि कृतानि, तेषु एकस्य उल्लेखः अधस्तात् क्रियते।



(तांत्या टोपे)

बुन्देलखण्डे तदा सेनानायकः **तांत्या टोपे** आंग्लानां विरोधे सक्रियः आसीत्। तं दमयितुं मुम्बईनगरात् जनरल-ह्यूरोजः बुन्देलखण्डं प्रत्यगच्छत्। मार्गे ब्रिटिशक्षेत्राधीनम् अतिलघु देशिराज्यं झांसी आसीत्। तदा स्वमातुः **लक्ष्मीबाई-महोदयायाः** संरक्षकत्वे अल्पवयस्कः बालः झांसी-राज्यं

शास्ति स्म। लक्ष्मीबाई सैनिकानां विरोधावसरे स्वप्रजां विरोधात् निवारितवती। परं केचित् आंग्लाः कथंचित् निहताः अभवन्। ह्यूरोजः अस्याः घटनायाः व्यपदेशेन झांसी-राज्यम् आक्रान्तवान्। राज्ञी लक्ष्मीबाई पौनःपुन्येन तं विज्ञापितवती, यद् आंग्लानां वधे झांसी-राज्यं सर्वथा निर्दोषम् अस्ति, परन्तु राज्य-लोलुपेन तेन किंचिद् अनाकर्ण्य झांसी-राज्यं स्व-सैनिकैः परिवेष्टितम्। तदा लक्ष्मीबाई सैन्य-संचालनस्य, साहसस्य, शौर्यस्य च अपूर्वं परिचयं दत्तवती। किन्तु आंग्लैः झांसी-राज्यम् जितम्। लक्ष्मीबाई ततः निर्गत्य ग्वालियर-नगरे तांत्याटोपे-सेनायां सेनानायकोऽभवत्। ताम् अनुसरन् ह्यूरोजः ग्वालियर-नगरम् आक्रान्तवान्। लक्ष्मीबाई तं सैन्यबलेन रुरोध, किन्तु आंग्लानां प्रत्यग्र-शस्त्रबलेन अभिभूता सा वीरांगना रिपूणां विस्मयकरं शौर्यं प्रदर्शयन्ती राष्ट्र-रक्षार्थं स्वप्राणान् जुहाव। तांत्याटोपे ससैनिकः ततः निर्गतः, किन्तु कालान्तरे नृशंसैः आंग्लैः निगृह्य प्राणदण्डेन दण्डितः जातः। झांसी-राज्यस्य वीरललना राज्ञी लक्ष्मीबाई अद्यापि भारतीयैः सश्रद्धं सादरं सगर्वं च स्मर्यते—



(राज्ञी लक्ष्मीबाई)

बुन्देले हरबोलों के मुंह हमने सुनी कहानी थी,
खूब लड़ी मर्दानी वह तो झांसी वाली रानी थी।

(सुभद्राकुमारी चौहान)

(हर-हर-वादिनां बुन्देलानां मुखेभ्यः अस्माभिः तस्याः शौर्य-गाथा श्रुताऽस्ति, झांसी-राज्यस्य राज्ञी सा (लक्ष्मीबाई) संग्राम-भूमौ पुरुष-सदृशं पराक्रमं प्रादर्शयत्।)

[४]

आंग्ल-शासकानां नृशंस-व्यवहारैः अन्यायैः लुण्ठन-वृत्त्या च उद्वेजितं भारतीय-जनमानसं प्रतिकार-परं जातम्। समग्र-राष्ट्रस्य जागरणे अनेके महानुभावाः अनेकाः संस्थाश्च यत्नपराः अभवन्। केषांचित् जनानां कासांचित् संस्थानां च परिचयः अत्र दीयते—



(राजा-राममोहनरायः)

राजाराममोहनरायः—एष विवेकशीलः मनीषी उभयोः प्राच्य-पाश्चात्य-पद्धत्योः संश्लिष्ट-रूपस्य समर्थकः आसीत्। १८२९तमेसवीये वर्षे तेन ब्रह्मसमाज-नाम्न्याः संस्थायाः स्थापना विहिता। तन्माध्यमेन असौ हिन्दू-जात्यां व्याप्तान् अन्धविश्वासान् विभिन्नाः कुरीतयश्च अपाकर्तुं प्रबलं-संघर्षं कृतवान्। सती-प्रथायाः जाति-प्रथायाः पुरुषाणां

बहुविवाह-प्रथायाश्च विरोधाय तेन जनान्दोलनम् आरब्धम्। विधवा-विवाहस्य समर्थनं कुर्वता तेन जनानां प्रबला: विरोधा: सोढा:। भारतीया: युवान: नवीन-विचारधारया नवीनै: विज्ञान-विषयैश्च परिचिता: स्यु:, इति हेतो: स पाश्चात्य-शिक्षापद्धते: पक्षधर: अनुमोदक: च आसीत्। असौ देशभक्त: पुनरुत्थानशीलस्य स्वतन्त्र-भारतस्य स्वप्नद्रष्टा मन्यते।



(ईश्वरचन्द्र-विद्यासागर:)

ईश्वरचन्द्रविद्यासागर: एष महोदय: भारतीय-प्राचीन-संस्कृते: पाश्चात्य-संस्कृतेश्च समर्थक: आसीत्। उदाराशय: स विचारयति स्म यत् संस्कृतं सर्वै: समानरूपेण पठनीया भाषा ब्राह्मणै: ब्राह्मणेतरैश्च। नारी-शिक्षायै तेन कृता: प्रयासा: सर्वेषाम् अभिनन्दनीया: सन्ति। विधवा-विवाहस्य प्रवर्तनाय तेन १८५५तमेसवीये वर्षे जनान्दोलनं कृतम्। बालविवाहस्य बहुविवाह-प्रथायाश्च प्रबल-विरोधिना तेन बहूनि प्रशंसनीयानि कार्याणि विहितानि।



(स्वामी दयानन्दः)

स्वामिदयानन्दः (१८२४-१८८३ईसवीये)—स्वामी दयानन्दः प्राचीन-वैदिक-पद्धत्याः समर्थकः वैदिक-विद्वान् आसीत्। तेन बहुविधानि समाज-हितानि कार्याणि विहितानि। यथा नारीशिक्षाप्रचारः, विधवाविवाह-समर्थनम्, अस्पृश्यता-निवारणम्, बालविवाह-बहुविवाह-प्रथानां वर्जनम्, मूर्तिपूजा-तीर्थयात्रा-पशुहिंसानां निषेधः, अवतारवादस्य खण्डनम्, गोरक्षायाः संस्तुतिः शुद्धि-माध्यमेन इतर-धर्मिणां वैदिकधर्मे प्रवेशः आदि। १८७५तमेसवीये-वर्षे मुम्बई-नगरे तेन आर्यसमाज-नाम्नी संस्था प्रतिष्ठापिता। पंजाब-प्रान्तस्य लाहौरनगरे १८७७तमेसवीये वर्षे परतन्त्र-भारतस्य विदेशि-शासनस्य च विषये तेन प्रकटिताः विचाराः महनीयाः मननीयाश्च सन्तिः-''विदेशि-शासनम् अतिश्रेष्ठम् अपि न वरम्, यतः तत् परतन्त्रतायाः प्रतीकम् अस्ति, अतः त्याज्यम्।''

स्वामिदयानन्दस्य निर्वाणान्ते तस्य अनुयायिभिः समग्र-देशे पाश्चात्य-शिक्षापद्धतिम् अनुसृत्य विद्यालयानां महाविद्यालयानां च स्थापना कृता। भारतीय-प्राचीन-पद्धत्या अपि **स्वामिना श्रद्धानन्देन** १९०२तमेशवीये वर्षे हरिद्वार-नगरे गुरुकुलकांगड़ी-नाम्नी शिक्षासंस्था प्रतिष्ठापिता अभूत्। इत्थं भारते धर्मरुचीनां जनानां प्रयासेन अनेकाः गुरुकुल-संस्थाः यत्र तत्र स्थापिता अभवन्। राष्ट्रोत्थाने स्वतन्त्रता-लब्धये च एतासां संस्थानां विशिष्टं बहुमूल्यं च योगदानं वर्तते।

श्रीरामकृष्ण-परमहंसः (१८३४-१८८६ईसवीये), **श्रीविवेकानन्दः** (१८६३-१९०२ईसवीये) च–

श्रीरामकृष्ण-परमहंसस्य एतद् वचनं स्वर्णाक्षरैः अङ्कनीयं यत् मानवस्य सेवा एव ईश्वरस्य सेवा अस्ति। उदारधीः श्रीपरमहंसः विश्वसिति स्म यत् सर्वेषां धर्माणां मूलभूताः सत्यसिद्धान्ताः समानाः एव वर्तन्ते।



(स्वामी विवेकानन्दः)

स्वामी विवेकानन्दः श्रीरामकृष्ण-परमहंसस्य सच्छिष्यः आसीत्। असौ कथयति स्म, यत् स्वतन्त्र-चिन्तनपराः भूत्वा वयं हीनभावनां परिहाय विश्वस्य अन्यराष्ट्रेषु भारतदेशम् अपि एकतमं गौरवान्वितं राष्ट्रं मन्येमहि। तदैव भारतं समुन्नतिं प्राप्स्यति। स्वगुरोः श्रीरामकृष्णस्य इव तस्यापि प्रियं वाक्यम् आसीत् यत् प्रत्येकस्याः जातेः पीडितः मानवः मम ईश्वरः अस्ति।

१९९६तमेसवीये वर्षे तेन रामकृष्णमिशन-नाम्नी संस्था संस्थापिता। तस्याः माध्यमेन असौ समाज-कल्याण-कर्मसु दिवानिशं संलग्नः अभूत्।



(सैयद-अहमदखान:)

सैयद-अहमदखानः (१८१७-१८९८ ई०),

अल्लामः मुहम्मदः 'इकबालः' (१८७६-१९३८ ई०) च—

सैयद-अहमद-ख़ानेन अशिक्षित-प्रायेषु मुस्लिम-जनेषु प्रबोधम् उत्पादयितुम् उत्तरप्रदेशस्य अलीगढ नगरे १८७५तमेसवीये वर्षे 'मुहम्मडन ऐंग्लो ओरियंटल कालेज'- नाम्याः संस्थायाः स्थापना कृता। कालान्तरे एषा 'अलीगढ़-मुस्लिम-विश्वविद्यालयः' इति नाम्ना प्रथिता अभवत्।



(अल्लमा मुहम्मदः इकबालः)

इकबाल-महोदय: पारसीक-भाषाया: उर्दू-भाषायाश्च ख्यात-नामा अतिसमर्थ: कवि: आसीत्। अस्यैव कवे: प्रसिद्धं गीतम् अस्ति–

सारे जहाँ से अच्छा हिन्दोस्ताँ हमारा
हम बुलबुले हैं इसकी, यह गुलसिताँ हमारा।

(भारतदेश: अस्ति श्रेष्ठ: विश्वेभ्य: देशेभ्य: खलु। एष अस्माकं रम्यम् उद्यानम्। वयं च एतस्य बुल्बुला:।)

[५]

भारतीय-राष्ट्रिय-कांग्रेस:

१८८५तमेसवीये वर्षे भारतीय-राष्ट्रिय-कांग्रेस इत्याख्य-राजनैतिक संस्थाया: उदय: जात:। अस्या: संस्थाया: उद्‌भावक: एक: आंग्ल: ए. ओ. ह्यूम-महोदय: आसीत् इति विस्मयकरं विभाति। वस्तुत: अस्या: उदय: आकस्मिक: न आसीत्। अस्य पृष्ठभूमौ अनेके ते देशभक्ता: संस्थाश्च आसन्, यै: याभिश्च ईदृश्या: संस्थाया: आवश्यकता अनुभूयते स्म।

राष्ट्रिय-कांग्रेसस्य प्रथमम् अधिवेशनं १८८५तमेसवीये वर्षे दिसम्बर-मासे श्रीव्योमेशचन्द्र-बेनर्जी-महोदयस्य अध्यक्षत्वे अभवत्। इत्थं प्रतिवर्षम् अस्मिन् एव मासे भारतस्य विभिन्नेषु स्थानेषु अधिवेशनानि अभवन्। एषाम् अधिवेशनानाम् अध्यक्ष-पदम् अलंकुर्वतां केषांचित्



(दादाभाई नौरोजी)

नामानि अधस्ताद् दीयन्ते—**दादाभाई नौरोजी, बदरुद्दीन-तैयबः, फिरोज़शाह-मेहता, सुरेन्द्रनाथ-बनर्जी, रमेशचन्द्र-दत्तः आदि।**



(महादेव-गोविन्द-रानाडे)

राष्ट्रिय-आन्दोलनेषु निरताः प्रथित-यशसः केचित् नेतारः आसन्—**महादेवगोविन्द-रानाडे, बालगंगाधर-तिलकः, मदनमोहन-मालवीयः।** कांग्रेसस्य प्रतिनिधिसदस्याः समाजस्य सर्वैः विशिष्टवर्गैः सह सम्बद्धा आसन्, यथा पत्रकाराः, अध्यापकाः, विधिवक्तारः, व्यापारिणः उद्योगपतयः, भूस्वामिनः आदि।



(बालगंगाधर-तिलक:)

तत्कालीना: राष्ट्रवादि-नेतार: सौम्यदलेन (नरम-दलेन) सम्बद्धा आसन्। एते विश्वसन्ति स्म यत् पूर्वं एतद् आवश्यकम् अस्ति यद् भारतीय-जनता भारत-राष्ट्रेण सह आत्मीयता-सम्बन्धं पुष्णातु। राष्ट्रियैकता-भाव: एव स्वतन्त्रता-प्राप्ते: मूलमन्त्र: विद्यते इति सर्वे भारतवासिन: अनुभवन्तु। भारतीया एतद् अपि जानन्तु यद् ब्रिटिश-शासनेन भारतस्य त्रिधा शोषणं कृतम्—उद्योगस्य, व्यापारस्य वित्तस्य च अपहरणेन।

अत्रान्तरे राष्ट्रवादिभि: विधायि-परिषदां प्रसाराय शासनं प्रति साग्रहम् अर्थना कृता, आन्दोलनम् अपि कृतम्। तेषाम् इदम् आन्दोलनं दमयितुं शासकै: १८९२तमेसवीये वर्षे 'भारतीय-परिषद्' आख्य: अधिनियम: पारित:। एतदनुसारं तै: शासकै: राजकीय-विधायि-परिषदि प्रान्तीय-परिषदि च भारतीय-सदस्यानाम् अपेक्षया राजकीय-सदस्यानां संख्या पर्याप्तम् अधिका कृता। एतेन राष्ट्रवादिन: नेतार: भृशम्

असुन्तुष्टाः जाताः। ते भारतीय-सदस्यानाम् अधिकां संख्याम् वाञ्छन्ति स्म।

राष्ट्रवादिनः नेतारः जानन्ति स्म यद् विदेशि-शासनस्य लक्ष्यम् अस्ति भारतीया अर्थव्यवस्था ब्रिटिश-अर्थव्यवस्थायाः अधीना स्यात् इति। भारतस्य अर्थव्यवस्थायाः विदेशि-शासनेन कृता दुर्दशा एव आसीत् मूलकारणं सामान्यजनानां दारिद्र्यस्य। भारतीया सम्पद् आंग्लदेशं सम्प्रेष्यते इति आसीत् अपरं कारणम्।

यदा नेतॄणां भाषणेषु भारतीया जनाः वास्तविकीं स्थितिं ज्ञातवन्तः, तदा ते भृशं दुखिताः उद्वेजिताश्च जाताः। तैः निश्चयः कृतः यद् वयं विदेशे निर्मित-वस्तूनां बहिष्कारं करिष्यामः। स्वेदश-निर्मितानाम् एव उपयोगं प्रयोगं वा विधास्यामः। कतिपय-वर्षैः स्वदेशि-वस्तुप्रयोग-विचारः सर्वत्र प्रासरत्। ईदृशेषु आन्दोलनेषु उत्साह-सम्भरिताः जनाः पूना-आदि-नगरेषु विदेशि-वस्त्राणां होलिका-रूपेण अग्निदाहम् अकार्षुः। एष आसीत् वस्तुतः नवजागरणस्य प्रारम्भः।

तत्कालीनैः राष्टवादिभिः अन्यानि अपि आन्दोलनानि प्रारब्धानि। यथा–

१. प्रशासकीय-सेवासु उच्चतर-पदानां भारतीयकरणं स्यात्।

२. न्यायिकाः अधिकाराः कार्यकारिभ्यः अधिकारिभ्यः पृथक् करणीयाः।

३. कुसीद-लुब्धेभ्य: कृषकाणां हितरक्षणाय कृषि-बैंकानां स्थापना भवेत्।

४. जीविकोपार्जनाय दक्षिणाफ्रीका-मलाया-मारीशस-वेस्टइंडीज़-ब्रिटिशगुयाना-आदि-देशेषु गतै: भारतीयै: सह तत्रत्यै: आंग्लै: य: अमानुषिक: व्यवहार: क्रियते, स: अवरुध्येत।



(मोहनदास-कर्मचंद-गांधी)

स्मरणीयम् अत्र यत् दक्षिणाफ्रीका-देशे प्रवासिन: भारतीयान् प्रति य: नृशंसता-पूर्ण: व्यवहार: क्रियते स्म, तस्य विरोधाय **श्रीमोहनदास-कर्मचन्द-गान्धिना (महात्मागान्धिना)** जनान्दोलनं कृतम् आसीत्।

एतेषां सर्वेषां प्रयासानाम् एव परिणाम: जात: यत् भाषणस्य


मुद्रणयन्त्रस्य च स्वतन्त्रतायाः महत्त्वम् अजानन् भारतीयाः। न केवलम् इदमेव, अपितु लोकतान्त्रिक-पद्धत्या, तत्सम्बन्धिन्या विचारधारया अपि तेषां परिचयः जातः।

१८९७तमेशवीये वर्षे मुम्बई-शासनं क्रान्तिविचाराणां प्रसारणं निरोद्धुं **श्रीबालगंगाधरतिलकं**, अन्यान् नेतॄन् समाचारपत्राणां सम्पादकान् निगृह्य कारासु अक्षिपत् अथवा अण्डमानद्वीपे प्रैषयत्।

१८९९तमेशवीये वर्षे लार्ड-कर्ज़नेन—भारतस्य नूतनेन राष्ट्राध्यक्षेण-(गवर्नरजनरल-पदासीनेन)—स्पष्टम् उद्घोषितं यद् असौ कांग्रेस-दलं निर्मूलयिष्यति। तस्य नीतिः आसीत् विभिन्न-पक्षेषु भेदभावना उत्पाद्येत इति।


[६]

बंगवासिषु राष्ट्रियचेतना परस्परम् ऐक्यभावना च इतर-प्रदेशापेक्षया अधिकतरा आसीत्, अतः बंगदेशः राष्ट्रिय-मुक्ति-आन्दोलनस्य केन्द्रः जातः। बंगप्रदेशं क्षीणशक्तिं कर्तुं लार्ड-कर्ज़नेन १९०५तमेसवीये वर्षे जुलाई-मासे **बंगदेशस्य भागद्वये विभाजनं** कृतम् (१) पश्चिमीय-बंगः, (२) पूर्वीय-बंगश्च। एतेन विभाजनेन (क) पश्चिमीय-बंगे बिहारि-जनानाम् ओडिसा-जनानां च बाहुल्यं जातम्। (ख) असम-सहिते पूर्वीय-बंगे यद्यपि बंगीय-जनानां बाहुल्यम् आसीत्, परम् मुस्लिम-जनानां प्राधान्यम् अवर्तत। आंग्लैः तेभ्यः प्रलोभनं दत्तं यत् ते अस्मिन् नव-विभक्ते प्रदेशे बुद्धिजीवि-हिन्दूनाम् अपेक्षया महत्त्वपूर्णेषु पदेषु अधिक-संख्यायां प्रतिष्ठिताः करिष्यन्ते।



(बंगदेशस्य विभाजनम्)

अनेन विभाजनेन जनतायाः अति-लघुवर्गं विहाय अन्ये वर्गाः अत्यर्थम् असन्तुष्टाः रुष्टाश्च आसन्। तेषु भूस्वामिनः उद्योगपतयः बुद्धिजीविनः लोकाः अविद्यन्त। परिणामतः, कांग्रेसस्य उग्रदल-विनम्र-दलयोः नेतृभिः मिलित्वा भारतस्य सर्वेषु प्रमुख-नगरेषु उग्रम् आन्दोलनं प्रारब्धम्। बंग-विभाजन-दिवसः शोकदिवसः उद्घोषितः आन्दोलनस्य सूत्रधाराः आसन्—**सुरेन्द्रनाथबनर्जी, विपिनचन्द्र-पालः, अब्दुलरसूल-**




(श्री रवीन्द्रनाथ-ठाकुर:)

प्रभृतय:। **श्री रवीन्द्रनाथठाकुरस्य** परामर्शेन एष दिवस: जनैक्यस्य परस्परं मैत्र्याश्च दिवस-रूपेण मानित: अभवत्। हिन्दू-मुस्लिम-ईसाई-जनै: भ्रातृवत् अन्योन्यं रक्षाबन्धन-विधि: सम्पादित:।



(श्रीगोपालकृष्ण-गोखले)

आन्दोलनस्य प्रभावेण सामान्य-जनेषु स्वदेशि-वस्तूनां स्वीकरणे, विदेशि-वस्तुजातस्य च बहिष्करणे प्रवृत्तिः जागरिता अभवत् । १९०५-तमेसवीये वर्षे **गोपालकृष्ण-गोखले**-महोदयस्य अध्यक्षतायां सम्पन्ने वाराणसी-अधिवेशने, १९०६ तमेसवीये वर्षे **दादाभाई-नौरोजी** महाभागस्य अध्यक्षत्वे सम्पन्ने कालिकाता-अधिवेशने एते प्रवृत्ती प्रकामं चर्चिते समर्थिते च अभवताम्। एतयोः अधिवेशनयोः स्वतन्त्रता-प्राप्तिः कांग्रेसस्य लक्ष्यत्वेन उद्घोषिता जाता। एतेन देशे सर्वत्र क्रान्तये उत्साहः समुद्भूतः। शासनेन आन्दोलनस्य प्रभावं शमयितुं दमनम् आरब्धम्। १९०७-तमेसवीये वर्षे **लाला-लाजपतरायः**, १९०८तमेसवीये वर्षे बालगंगाधर- तिलकः निगृह्य बर्मादेशे निवासितौ विपिनचन्द्र-पालोऽपि



(लाला लाजपतराय:)

बन्दीकृत:। एतस्य प्रतिक्रिया रूपेण देशे अनेकेषु नगरेषु उग्र-प्रदर्शनानाम् आयोजनम् अभवत्। प्रदर्शनेषु अनेके जना: आरक्षि-दलेन गोलिकाभि: हता: ।

१९०९तमेसवीये वर्षे आंग्ल-शासकै: इण्डियन-कौंसिल-आख्य: (मार्लेमिण्टो सुधार इति नाम्ना ख्यात:) अधिनियम: पारित:। एतेन केन्द्रिय-परिषदि विधान-परिषत्सु च सदस्यानां संख्या अवर्धत। एतस्य अधिनियमस्य द्वे उद्देश्ये आस्ताम्—(१) राष्ट्रवादिनां मध्ये परस्परं मतभेद: वैमनस्यं च समुदेतु। (२) परिषत्सु मुस्लिमेभ्य: सुरक्षितं सदस्यता-स्थानं कृत्वा हिन्दू-मुस्लिमानां मिथ: विश्लेष:। शासनेन मुस्लिम-नेतार: उत्तेजिता: यत् तेषां राजनैतिक-आर्थिक-सांस्कृतिक-हितानि हिन्दूजात्या: हितेभ्य: नितरां पृथक् सन्ति। एवम् समग्र-देशे तै: साम्प्रदायिकताया: विष-वृक्षस्य बीजम् उप्तम्। एतेन तथाकथित-सुधाराधिनियमेन तै: अल्पसंख्यका: भारतीया: सन्तोषिता:।

[७]

एतत् उल्लेखनीयं यत् कांग्रेसस्य उग्रदल-विनम्रदलातिरिक्तम् ब्रिटिश-राज्यविरोधीनि अन्यानि संघटनानि अपि आसन्। आंग्लानां दमन-नीति-विरोधे उग्रताम् अवलम्ब्य तानि प्रतिकारं विदधति स्म। उदाहरणार्थम्—

(क) १९०८तमेसवीयेवर्षे **खुदीरामबोस-प्रफुल्लचाकी**-नामभ्यां युवभ्यां किंग्सफोर्डाख्यस्य कुख्यात-न्यायाधीशस्य वधार्थं मुज़फ़्फ़रपुरे एकस्मिन् अश्वशकटे 'बम'-आख्यस्य आग्नेयास्त्रस्य प्रयोगः कृतः। तयोः भ्रान्ति-वशात् शकटस्थे द्वे आंग्लमहिले 'बम'-प्रक्षेपणात् निहते जाते। तदा निगृहीतः खुदीरामबोसः मृत्यु-दण्डेन दण्डितः जातः, प्रफुल्लचाकी च आत्महत्यां चकार।


(खुदीराम-बोसः)



(अरविन्द-घोष:)

(ख) **कालिकाता-नगरे अरविन्दघोष:** तस्य भ्राता **बरिन्द्रकुमार-बोस: च** उभौ क्रान्तिकारिणौ अनुयायिभि: सहितौ निगृह्य कारायां क्षिप्तौ।

(ग) १९११तमेसवीये वर्षे दिल्ली-नगरे एक: 'दरबार' नाम महासमारोह: आयोजित: अभवत्। तत्र ब्रिटेनस्य सम्राट् जार्ज-पंचम: साम्राज्ञी-सहित: समायात:। अस्मिन् समारोहे अनेकै: देशीय-राज्याधिकारिभि: समेत्य ब्रिटिश-शासनं प्रति स्वीया निष्ठा प्रकटीकृता आसीत्। तत्र तत्कालीन-वायसरायेण लार्ड-हार्डिंग-महोदयेन १९०५तमेसवीये वर्षे पारिता बंगविभाजन-योजना निरस्तीकृता। अथ च कालिकाता-स्थाने दिल्ली-नगरी भारतस्य राजधानी घोषिता जाता।

परं क्रान्तिकारिण: तु ब्रिटिश-शासनं भारतात् समूलम् उच्छेत्तुं तत्परा आसन्। तै: तत्र अनेकेषां ब्रिटिशाधिकारिणां वध: कृत:। १९१२-

तमेसवीये वर्षे **रासबिहारी-बोसस्य सचिन-सान्यालस्य** च नेतृत्वे दिल्ल्यां चांदनीचौक-आपणे लार्ड-हार्डिंगस्य शोभा-यात्रायां बमः प्रक्षिप्तः आसीत्। गजारूढ़ः लार्ड-हार्डिंगः दैवयोगात् सुरक्षितः अभवत्। विदेशेषु अपि भारतीय-क्रान्तिकारिणः सक्रियाः आसन्। **मदनलालधींगडा**-नाम्ना क्रान्तिकारिणा कर्जनबाइली इत्याख्यस्य आंग्लस्य वधः कृतः।



(बी. डी. सावरकरः)

१९१३तमेसवीये वर्षे अमेरिका-कनाडा-वासिभिः भारतीय-क्रान्तिकारिभिः उत्तरीय-अमेरिका-भूखण्डस्य सैनफ्रांसिस्को-नगरे 'ग़दरपार्टी' नाम संघटनं स्थापितम्। अस्य सदस्या प्रायः पंजाबः-प्रदेशस्य सिक्ख-कृषकाः भूतपूर्व-सैनिकाश्च आसन्। संघटनस्य उल्लेखनीयानां सदस्यानां नामानि सन्ति—हरदयालः, मुहम्मद-बरकतुल्ला, भगवान्सिंहः, सोहनसिंह-खन्ना, रामचन्द्रः, श्यामजीकृष्ण-वर्मा, **बी. डी. सावरकरः**, अजीतसिंहः, मैडम-कामा आदयः। अस्य संघटनस्य शाखाः मैक्सिको- जापान-चीन-फिलीपीन-मलाया-सिंगापुर-थाईलैण्ड-हिन्दचीन-पूर्वीय-दक्षिणीय-

अफ्रीका-आदिषु देशेषु अपि संचाल्यन्ते स्म। अनेन संघटनेन 'ग़दर'-नाम्ना साप्ताहिकी पत्रिका अपि अनेकासु भारतीय-भाषासु प्रकाशयितुम् आरब्धा। अस्या मुखपृष्ठे मुद्रितम् अभवत्-'आंग्ल- शासनस्य शत्रुः ग़दर-पत्रिका'।

तेषु दिवसेषु ब्रिटेन-जर्मन-देशयोः मध्ये महायुद्धस्य तीव्रा सम्भावना जाता। भारतीय क्रान्तिकारिणां बहुविधासु योजनासु एकतमा योजना आसीत् यत् ब्रिटेनस्य उपनिवेशेषु युगपदेव क्रान्तिः क्रियेत। एतस्य कार्यस्य सम्पूर्तये तैः ग़दर-पत्रिकायां अधोलिखितं विज्ञापनं प्रकाशितम्— **''आवश्यकताऽस्ति वीरसैनिकानाम्। वेतनम्—मृत्युः। पुरस्कारः—बलिदानम्। सेवाविरामे भृतिः (पेंशन)—स्वतन्त्रता। युद्धस्थलम्—भारतदेशः।''**

[८]

१९१४-१९१८तमेसवीयेषु चतुर्षु वर्षेषु **प्रथम महायुद्धम्** अघटत। अस्मिन् अन्तराले ग़दर-संघटनस्य कतिपय-सहस्राणि सदस्याः अमेरिका-देशात् दक्षिणपूर्व-एशिया-प्रायःद्वीपं भारतवर्षं च आगत्य अनेकैः सैनिकैः सैन्यदलैश्च साकं सम्पर्कं स्थापितवन्तः। ते तान् विद्रोहार्थं समुद्यतान् अकुर्वन्। सशस्त्र-विद्रोहार्थं २१-२-१९१५तम-दिनांकः निश्चितः अभवत्। परं दौर्भाग्यात् आंग्लैः एषा गुप्त-योजना अवगता। ग़दर-संघटनस्य सैनिकाः अनेके नेतारश्च प्राणदण्डेन दण्डिताः। तेषां केचन कारासु प्रेषिताः।

अत्रान्तरे **बाघाजतिन**-नाम्ना एकेन क्रान्तिकारिणा जर्मन-देशात् अनेकानि शस्त्राणि आनीतानि, परं दैवयोगात् स तेषां प्रयोगात् पूर्वम् एव ब्रिटिश-शासकैः निहतः। १९-वर्षीयः **'कर्तारसिंह-सराभा'**-नामधेयः एकः क्रान्तिकारी कारागारे क्षिप्तः जातः। काबुल-नगरे एकेन क्रान्तिकारि-दलेन स्वतन्त्र-भारतस्य अन्तरिम-शासनं स्थापितम्। **राजा महेन्द्रप्रतापः** अस्य राष्ट्रपतिः आसीत्, **श्री बरकतुल्ला** च प्रधानमन्त्री। इत्थम् अनेकैः क्रान्तिकारिभिः ब्रिटिश-शासनस्य अवसानाय सोत्साहं कार्यं कृतम्। यद्यपि ते साफल्यं नावापुः, परं तेषां वीरकृत्यैः भारते स्वतन्त्रतायाः प्राप्तीच्छा अत्युद्दाम-वेगेन जागरिता अभवत्।

१९१४-१९१५तमेसवीयवर्षयोः **एनीबेसेंट**-महोदयायाः, लोकमान्य-तिलक-महोदयस्य च पृथक् प्रयासैः संयुक्त-प्रयासैश्च **'स्वराज्य-संघटन-आन्दोलनं (होम-रूल-लीग मूवमेंट)** प्रारब्धम्। अत्र कांग्रेसस्य सहयोगः अपि गृहीतः आसीत्। एष सहयोगः 'लखनऊ-अनुबन्ध' (लखनऊ-ऐक्ट) इति नाम्ना ख्यातः अस्ति।

अत्र उल्लेखनीयं यत् महात्मा गान्धी १८९३तमेसवीये वर्षे २४वर्ष-वयसि दक्षिणाफ्रीका-देशं गतः आसीत्। तत्रत्यान् भारतीयान् प्रति आंग्लैः कृतानाम् अन्यायानां नृशंस-व्यवहाराणां च विरोधाय तेन तत्र बहुविधानि आन्दोलनानि कृतानि। ततः भारतं प्रत्यावृत्य असौ १९१५तमेसवीये वर्षे भारतीयानां परतन्त्रता-जनित-दुर्दशायाः निवारणाय बहुविधेषु कार्येषु संलग्नः जातः। चम्पारण-अहमदाबाद-खेड़ा-नगरेषु तेन कार्यारम्भः कृतः। कृषकाणां शिल्पशाला (मिल)-श्रमिकाणां च आर्थिक्याः स्थितेः प्रोन्नतये शासकानां शान्तिपूर्वकम् अवज्ञां कृत्वा 'मिल'-स्वामिभिश्च सद्वार्तां कृत्वा असौ अभीष्ट-सिद्धिं लब्धवान्।



(श्रीमती एनीबेसेंट-महोदया)

एतदनन्तरम् असौ उपर्युक्त 'होम-लीग-आन्दोलनस्य विस्तारे साहाय्यम् अकार्षीत्। अल्पीयसा कालेन एतद् आन्दोलनं सकल-देश-व्यापि-स्वरूपम् अगृह्णात्। तदा आंग्लानां दमनचक्रम् अपि प्रखरं जातम्। १९१७तमेसवीये वर्षे **एनी बेसेंट-महोदया** तस्याः सहयोगिनश्च कारागारे क्षिप्ताः अभवन्। एतेन सामान्यजनाः उद्वेलिताः जाताः। होमरूल-लीगस्य सदस्यानां संख्यायाम् अनायासम् एव वृद्धिः जाता। एतत् सर्वं मनसि निधाय माण्टाग्यू-इत्याख्य-गृहसचिवेन लन्दन-स्थित-लोकसभायां (हाउस आफ कामन्स) घोषणा कृता यद् भारतस्य प्रशासने भारतीय-जनता अपि सहभागिनी क्रियेत। पुनः तेनोक्तं यद् भारतीयानां स्व-शासनस्य स्थापना उचिते समये विधास्यते। स उचितः समयः कदा भविष्यति, एतस्य निर्णयम् शासनं करिष्यति।

तस्मिन् एव वर्षे एनीबेसेंट-महोदया कारायाः मुक्ता अभवत्। होमरूल-लीग-आन्दोलनं यद्यपि एतदनन्तरं मन्दं जातम्, परम् एतेन लब्ध-नवजागरण-सन्देशाः युवकाः स्वतन्त्रता-प्राप्तये सन्नद्धाः जाताः।

[९]

१९१८तमेसवीये वर्षे न्यायाधीश-रौलटस्य अध्यक्षतायाम् एकः निर्ममः 'रौलट-अधिनियमः' पारितः अभवत्, यत् भारते स्वतन्त्रता-संघर्ष-रतेभ्यः कठोरः दण्डः दीयेत। बन्दिनः विधाय ते न्यायालयस्य प्रक्रियां विनैव अण्डेमान-निकोबार-द्वीपसमूहे (काला पानी) प्रेषयामासुः।

१९१९तमेसवीये वर्षे यदा महात्मा गान्धी रौलट-अधिनियमस्य (रोलट-ऐक्ट) विरोधे जनतायां सत्याग्रहस्य आह्वानम् अकरोत्, तदा युवाशक्तिः अग्रेसरा अभवत्। समग्र-देशे रोषाकुल-जनतायाम् असन्तोषः प्रासरत्। अभूतपूर्वः व्यापकः विरोधः भारतीयैः प्रदर्शितः। शासनेन विरोधस्य दमनाय निर्दयतया दण्डैः गोलिकाभिः च सभासु जनाः ताडिताः हताश्च।

एतस्मिन् प्रसंगे १०-४-१९१९तमे दिनांके डॉ॰ सत्यपालः, डॉ॰ सैफुद्दीनकिचलूः च उभौ नेतारौ बन्दीकृतौ। १३-४-१९१९तमे दिनांके वैशाखी-पर्वणि **जलियांवाला-प्रांगणे** अनेक-सहस्राणि जनाः विरोधं प्रकटयितुम् एकत्रिताः आसन्। तत्र वृद्धाः, महिलाः, शिशवः अपि अवर्तन्त। तदा तत्र, जनरल-डायरनामा एकः ब्रिटिशाधिकारी स्वसैनिकैः सह समायातः। तेन एकत्रितान् जनान् प्रति तस्मात् प्रांगणात्



(जलियांवाला-प्रांगणे)

बहिर्गमनादेशं विनैव गोलिका-वृष्टिः आदिष्टा। दश-मिनिट-मिते काले एकसहस्रं जनाः हताः अभवन्। प्रायः द्वे सहस्रे जनाः आहताः जाताः। स नरपशुः डायरः सगर्वम् अवदत् यन्मया क्रान्ति कारिणः पाठं पाठिताः।

एतत्प्रसंगे उल्लेखनीयं यत् २१-वर्षानन्तरम् १९४०तमेसवीये वर्षे ऊधमसिंहाख्येन एकेन भारतीय-क्रान्तिकारिणा तत्प्रतिशोध-कामनया अस्य नृशंसस्य माइकेल-ओडायरस्य आंग्लदेशे गोलिका-प्रहारेण वधः कृतः। जलियांवाला-हत्याकाण्ड-दिवसेषु जनरल-डायरः पंजाबप्रान्तस्य उपराज्यपालः आसीत्।

अनेन हत्याकाण्डेन न केवलं पंजाबप्रान्ते अपितु समस्ते देशे लोकाः स्तब्धतां गताः। हिन्दू-मुस्लिम-सिक्ख-धर्मावलम्बिभिः सर्वैः जनैः संभूय विविधानि आन्दोलनानि कृतानि। आन्दोलन-निरोधाय ब्रिटिशशासनं लोकान् विविधैः प्रकारैः समपीडयत्। तेषाम् अत्याचार-परम्परायाम् अनेके जनाः सार्वजनिक रूपेण कशाभिः ताडिताः, कारासु क्षिप्ताः, देशात् निर्वासिताः, केषांचित् सम्पत्तिः अधिगृहीता, केचित् भूमौ उदरेण चलितुं विवशीकृताः। पंजाब-प्रान्ते सैनिकाधिनियमः (मार्शल ला) प्रवर्तितः। आंग्लानाम् अमानुषिकैः व्यवहारैः क्षुब्ध-मनसा रवीन्द्रनाथ-ठाकुरेण ब्रिटिश-शासनेन प्राप्तस्य 'नाइटहुड'-नाम्नः विशेष- सम्मानस्य परित्याग-घोषणा विहिता।

प्रथमं विश्वयुद्धं १९१४तः प्रारभ्य १९१८तमेसवीये वर्षे समाप्तिम् अगात्। वर्षेऽस्मिन् सम्पन्ने कांग्रेसाधिवेशने उपस्थिताः जनाः स्वतन्त्रता-प्राप्तये शासनस्य दमननीतेः विरोधाय च तीव्रतरेण वेगेन अभियानम् आरब्धुं संकल्पं कृतवन्तः!

विश्वयुद्धे तुर्कीदेशः ब्रिटिशेन पराजितः अभवत्। एष देशोऽपि आंग्लानां क्रूरेण व्यवहारेण पीडितः आसीत्। तुर्की-देशस्य शासकेन

'ख़लीफ़ाख्येन' धर्मगुरुणा आंग्लानां विरोधाय भारते ख़िलाफत-आन्दोलनम् आरब्धम्। एतस्य नेतारः आसन्—मुहम्मदअली, शौकतअली, अबुलकलाम-आज़ादः, हकीम-अजमलखां, हसरत-मोहानी आदयः।

लोकमान्य-बालगंगाधर-तिलकः, महात्मागान्धी, अन्ये च नेतारः खिलाफत-आन्दोलने सम्मिल्य ब्रिटिश-शासनस्य विरोधम् उद्दीपयामासुः।

१९२०तमेसवीये वर्षे दिसम्बर-मासे कांग्रेसस्य नागपुर-अधिवेशने महात्मगान्धिनः सक्षमे नेतृत्वे, एतद् आन्दोलनम् 'असहयोग-आन्दोलने' परिणतं जातम्। अस्य लक्ष्यम् आसीत् स्वराज्यप्राप्तिः।

१९२२तमेसवीयस्य वर्षस्य जनवरी-मासात् एव निम्नलिखितानि कार्याणि शान्तिपूर्वकम् आरब्धानि—

(१) अनेकैः जनैः ब्रिटिश-शासनेन प्रदत्तानि विविधानि उपाधीनि प्रशस्ति-पत्राणि च परित्यक्तानि।

(२) अनेकेषु नगरेषु विदेशि-वस्त्राणि होलिकादाहे दग्धानि। एतेन सामान्य-जनेषु ब्रिटिशशासनं प्रति विरोधः अतीव प्रखरः जातः। विदेशि-वस्त्रव्यापारः अपि एतेन कार्येण क्षतिग्रस्तः अजायत। खादी-वस्त्राणां धारणे, तांतव-यन्त्रस्य (चरख़ा इत्यस्य) चालने सामान्य-जनानां रुचिः जागरिता अभवत्। खादीधारणं राष्ट्रियान्दोलनस्य प्रतीकं जातम्।

(३) अनेकेषु नगरेषु विशेषतः पश्चिमबंग-पंजाब-प्रान्तयोः नगरेषु प्रायः एकलक्ष-संख्यैः छात्रैः शासकीय-विद्यालयेषु महाविद्यालयेषु

च शिक्षाग्रहणं परित्यक्तम्। अधिसंख्यैः छात्रैः राष्ट्रीय-विद्यालय-महाविद्यालयेषु प्रवेशः गृहीतः। तदा 'नेशनल कालेज'- नामकस्य एकस्य महाविद्यालयस्य प्रधानाचार्यपदे प्रख्यातः नेता सुभाषचन्द्र-वसुः सेवारतः आसीत्।



(वल्लभभाई पटेलः)

(४) अभिभाषकाः (वकीलाः) न्यायालयेषु कर्मविरामम् अकुर्वन्, यद्यपि एतेशां संख्या अधिका न आसीत्। केचिद् विशिष्टाः अभिभाषकाः आसन् सी.आर. दासः, मोतीलालनेहरूः (जवाहरलाल-नेहरोः पितृमहोदयः), सैफुद्दीनकिचलूः, वल्लभभाई-पटेलः, सी. राजगोपालचारः, आसिफअली आदयः। एतेन सामान्य-जनाः प्रेरिताः अभवन् यद् विवादानां निर्णयाय प्रभूत-धन-समय-व्ययेषु न्यायालयेषु अगत्वा पंचायतेषु एव न्याय-प्राप्त्यै गन्तव्यम्।

१९२१तमेसवीये वर्षे विजयवाडा-नगरे सम्पन्ने कांग्रेससम्मेलने सदस्यैः निर्णयः कृतः यद् कांग्रेस-सदस्यानाम् संख्यायां भूयसी वृद्धिः करणीया, तिलकस्वराजकोषः स्थापनीयः खादीधारणस्य प्रचारः कर्तव्यः।

सम्मेलने निर्धारितानि लक्ष्याणि प्रायशः प्राप्तानि कांग्रेसेन। परिणामतः ब्रिटिशशासन-विरोधाय स्वराज्यस्य स्थापनाय च जनेषु अनुदिनम् उत्साहः प्रचारश्च अवर्धेताम्।

१९२१तमेसवीये वर्षे एव ख़िलाफ़त-आन्दोलनस्य सम्मेलने मुहम्मद-अली-महोदयेन घोषणा कृता यद् मुस्लिम-धर्मावलंम्बिनः कस्यचिद् अपि जनस्य सेनायां सेवावृत्तिः धर्मविरुद्धा अस्ति। मासत्रयानन्तरं महात्मगान्धि-प्रमुखैः कांग्रेसस्य वरिष्ठैः सदस्यैः उक्तकथनस्य पुष्टिं कुर्वद्भिः एतद् अपि प्रस्तावितं यत् न केवलं सामान्यजनाः अपितु सैनिका अपि दमनकारि-शासनात् सम्बन्धं विच्छेदयन्तु। एतत्सर्वम् अहिंसात्मकरूपेण शान्त्या एव सम्पादनीयम्- इति आसीद् आदेशः गान्धिमहोदयस्य अन्येषां च सदस्यानाम्।

परम् १९२१तमेसवीये वर्षे नवम्बरमासे यदा 'प्रिंस ऑफ वेल्स' इत्युपनामा राजकुमारः भारते समायातः, तदा मुम्बईनगरे तं प्रति रोषं प्रकटयितुं कर्मविरामः (हड़ताल)प्रवृत्तः। तत्र हिंसा अपि अभवत्। एतस्मिन् अवसरे महात्मगान्धिना दिनत्रयाय अनशनं प्रारब्धम्। तेन स्थितिः सामान्या जाता।

एषु दिनेषु **ख़िलाफ़त-आन्दोलन-असहयोग-आन्दोलनाभ्यां** सह **कृषकान्दोलनम्** अपि प्रारभत। एवं समस्ते भारते अन्यानि अपि आन्दोलनानि असहयोग-आन्दोलनेन सह प्राचलन्। शासनेन दमनं

प्रारब्धम्। बंगदेशे सी. आर. दासः बन्दीकृतः। रोषाकुला जनता शासनं प्रति विरोधं प्राकटयत्। परिणामतः, कतिपय-सहस्राणि जनाः कारासु निक्षिप्ताः अभवन्। एतस्मिन् कालान्तराले शासकैः प्रथमं महात्मगान्धिना, तदनु मालवीय-महोदयेन सह सन्धिवार्ते कृते, परम् एते असफले जाते। तत्कालीन-वायसरायेण लार्ड-रीडिंगेन पूर्वतः अपि अधिकम् एव दमनं प्रारब्धम्—यथा सभानां निषेधः, समाचारपत्रेषु प्रतिबन्धः, मध्यरात्रौ नेतृणां गृहेषु सहसा अभियोजनम् (छापा), तेषा बन्दीकरणं, तान् प्रति क्रूरः व्यवहारश्च।

१९२२ तमेसवीय-वर्षस्य प्रारम्भे चौरीचौरा-काण्डम् अभवत्। चौरीचौराख्ये गोरखपुर-ग्रामे एकस्यां शोभा-यात्रायां यदा आरक्षिभिः लोकैः सह अशोभनः व्यवहारः कृतः तदा तैः रोषाकुलैः जनैः २२-आरक्षिणः निहताः। तत्रस्थम् आरक्षिस्थानम् (थाना) वह्निना संदीपितम्।

एतेन हिंसाकाण्डेन क्षोभमापन्नस्य अहिंसावादिनः महात्मगान्धेः परामर्शेन प्रेरणया च कांग्रेस-कार्यकारिण्या प्रस्तावं पारयित्वा असहयोग-आन्दोलनस्य समाप्तिः घोषिता।

एतेन समाचारेण मोतीलालनेहरूः, सी.आर.दासः, सुभाषचन्द्र-वसुप्रमुखाः नेतारः स्तब्धाः जाताः। एकस्मिन् दूरवर्तिनि लघुग्रामे घटित-हिंसावृत्तेः दुष्परिणामं समस्तः देशः किमर्थम् सहताम्—इत्यासीद् रोषविषयः। तेषां नेतृणां गान्धिमहोदयं प्रति श्रद्धाभावे काचित् न्यूनता आगता। परं गान्धिनः मनः सशंकम् आसीत् यत् सामान्यजनाः अहिंसायाः शान्तेः च मार्गं परित्यज्य विदेशि-शासकान् प्रति यदि हिंसावृत्तिं धारयिष्यन्ति तदा अस्य परिणामः देशाय हितावहः न भविष्यति।

श्रीगान्धिना आशंका निर्मूला न आसीत्। भाविनं परिणामं विचिन्त्य तेन असहयोग-आन्दोलनं परावर्तितम्, किन्तु एषा स्थितिः अल्पकालिकी आसीत् न तु दीर्घकालीना।

[१०]

ब्रिटिश-सर्वकारेण सर-जान-साइमनस्य आध्यक्ष्ये एकः साइमन-आयोगः नियोजितः। आयोगस्य प्रमुखं कार्यम् आसीत् भारताधिनियम (इण्डिया एक्ट)-सम्बन्धे सम्यग् अवलोकनं निरीक्षणं परीक्षणं च। एतस्य आयोगस्य सर्वे सदस्याः आंग्लाः आसन्। नासीत् तत्र कश्चिद् भारतीयः। भारतस्य एषा अवमानना असह्या आसीत् । १९२८तमेसवीये वर्षे यदा सदस्यैः सह साइमनः भारतम् आयातः, तदा तस्य विरोधाय यत्र-तत्र सभानाम् आयोजनम् अभूत्, सरोषाणि प्रदर्शनानि अभवन्। नगरेषु कर्मविरामः प्रवृत्तः। लोकैः सामूहिक-रूपेण उद्घोषितम्-**साइमन-आयोग! प्रतिनिवर्तस्व**। क्षुब्धेन साइमनेन दमनचक्रं प्रवर्तितम्। मद्रास-नगरे आयोजितायां सभायां-गोलिकावृष्टिः-अक्रियत। देशे अनेकत्र सभासु कृतैः दण्डप्रहारैः जनाः क्षतविग्रहाः अजायन्त।




('साइमन-कमीशन! प्रतिनिवर्तस्व')

एकस्मिन् प्रदर्शने पंजाबकेसरी लाला-लाजपतराय: निर्ममेण दण्ड-प्रहारेण एवम् क्षत-वक्ष:स्थल: जात: यद् अचिरेण प्राणैर्विमुक्त: अभवत्। लखनऊ-नगरे जवाहरलाल-नेहरू: गोविन्दवल्लभ-पन्तश्च दण्डप्रहारान् असहेताम्। गोविन्दवल्लभ: तु पंगुतां यात:। एतेन दमन-चक्रेण उत्तेजिता: सामान्यजना: स्वतन्त्रता-प्राप्तये नवीनेन समुत्साहेन सम्भरिता: बभूवु:।




(जवाहरलाल-नेहरू:)



(गोविन्दवल्लभ-पन्त:)

३१-१२-१९२९तमे दिनांके लाहौर-नगरे सम्पन्ने कांग्रेसाधिवेशने स्वीये अध्यक्षीय-भाषणे जवाहरलाल-नेहरू: सोत्साहं स्वराज्य-प्राप्त्यर्थम् आह्वानं कृतवान्। अस्मिन् दिने अर्धरात्रौ तेन रावी-नदी-तीरे साह्लादं सोल्लासं च त्रिवर्ण-पताका गगने उत्तोलिता। अस्मिन् अधिवेशने कांग्रेस-कार्यकारिणी अधिकृता अभवत्, यद् एषा सविनयम् अवज्ञा-आन्दोलनम् आरभताम्। एतद्विषये पाठका: अग्रे पठिष्यन्ति।

२६-१-१९३०तमे दिनांके भारते प्रतिग्रामं प्रतिनगरं समायोजितासु सभासु जनै: स्वतन्त्रता-प्राप्तये सामूहिक-रूपेण शपथं गृहीतं राष्ट्रियध्वज: च समुत्तोलित:।



(सरदार-वल्लभभाई-पटेल:)

तस्मिन् एव काले बारदोली (गुजरात)-नगरे १९२८तमेसवीये वर्षे **सरदार-वल्लभभाई-पटेलस्य** अध्यक्षतायाम् आयोजित-सभायां कृषकै: प्रतिज्ञा कृता यत् ते असहनीयं भूमिकर-भारं शासकेभ्य: तावत् न दास्यन्ति, यावत् भूखण्ड-परिमाणोचित: भूमिकर: सम्यक् न निर्णीयते। कृषकाणां संघर्षं दृष्ट्वा शासनेन भूमिकरे न्यूनता कृता।

एतादृशा: संघर्षा: आन्दोलनानि च आंग्लानां देशात् निष्कासने स्वराज्य-प्राप्तौ च साहाय्यम् आचरिष्यन्ति—इति महात्मगान्धिन: एतत् कथनं १९४७तमेसवीये वर्षे सत्यं जातम्।

उपर्युक्त-सविनय-अवज्ञा-आन्दोलन-वृत्तस्य लेखनात् पूर्वं स्वतन्त्रता-प्राप्त्ये क्रान्तिकारिणां भूमिका अत्र प्रस्तूयते—



(रामप्रसाद-बिस्मिल:)

(१) १९२४तमेसवीये वर्षे सर्वप्रथमं कानपुरे क्रान्तिकारणिां यूनां सम्मेलनम् अभवत्। तेषां नेतार: आसन् रामप्रसाद-बिस्मिल:, शचीन्द्रनाथ-सान्याल: योगेश-चटर्जो च। क्रान्ति-सम्बन्धि-संघर्षस्य संचालनाय धनराशे: महती आवश्यकता आसीत्। एतदर्थं १९२५तमेसवीये वर्षे दशभि: सदस्यै: लखनऊ-समीपे काकोरी-नाम्नि ग्रामे एकां वाष्पाश-कटिकां (रेलगाड़ी) अवरुध्य रेलविभागस्य कोष: लुण्ठित:। एषा घटना काकोरी-काण्ड-इति नाम्ना ख्याता अस्ति।

शासकै: स्वदण्ड-प्रक्रियाम् अनुसरद्भि: अनेके युवान: कारासु क्षिप्ता:। अशफाकउल्ला-खां, रामप्रसाद-बिस्मिल:, रोशनसिंह:, राजेन्द्र: लाहिड़ी इति नामान: युवान: पाशबन्धेन मृत्युं नीता:। अन्येभ्य: नैकेभ्य: युवभ्य: आजीवनं कारावास: दत्त:। एषु



(चन्द्रशेखर-आज़ाद:)

तरुणेषु चन्द्रशेखर-आज़ाद: कस्मिश्चित् स्थाने अनिर्ज्ञात-निवास: जात:।

(२) पंजाब-प्रान्ते साइमन-आयोगस्य विरोध-प्रसंगे निधनम् उपेतस्य लाजपतराय-महोदयस्य बलिदानमभिलक्ष्य सर्वे भारतीया: क्षुब्धा: करुणाकुलिता: प्रतिशोध-कामा आसन्, १९२८-तमेसवीये वर्षे दिसम्बर-मासे भगतसिंह-चन्दशेखर आज़ाद-राजगुरु-नामभि: क्रान्तिकारिभि: पुलिस-अधिकारिण: सेण्डर्स-नामकस्य वध: कृत:, येन लाजपतराय-महोदयस्य उपरि दण्डप्रहार-वृष्टि: कृता आसीत्।

(३) ब्रिटिश-शासनम् जनता-सुरक्षा-विधेयकम् (पब्लिक सेफ्टी बिल), व्यापार-विवाद-विधेयकं (ट्रेड डिस्प्यूट बिल) इत्याख्यौ द्वौ विधेयकौ पारितौ कर्तुं सन्नद्धम् आसीत्। एतौ विधेयकौ भारतीय-जनताया: प्रतिबन्धाय आस्ताम्।

ब्रिटिश-शासनं बधिरम् अस्ति। एतेन अस्माकं चीत्कार: अपि श्रोतव्य: इति मनसि विधाय भगतसिंह-राजगुरु-सुखदेव-नामभि: त्रिभि: युवभि: केन्द्रीय-विधान-सभायाम् एकं साधारण-शक्ति-युतं 'बम' नामकम् अस्त्रं क्षिप्तम्।



(भगतसिंह:)



(सुखदेव:)



(राजगुरु:)

एते त्रय: युवान: यदा प्रतिदिनं न्यायालयं यान्ति स्म, तदा तारस्वरेण निनदन्ति स्म, "जीवतु परिवर्तनं, जीवतु (इन्क्लाब जिन्दाबाद)"! अपि च ते गायन्ति स्म–

सरफ़रोशी की तमन्ना अब हमारे दिल में है।
देखना है ज़ोर कितना बाजु-ए-कातिल में है।

(शिरस: समर्पणाय अभिलाषोऽस्ति अस्माकं हृदयेषु, दिदृक्षव: स्म: कियद् बलम् अस्ति घातुकस्य भुजयो:।)

समाचारपत्रेषु प्रतिदिनम् एषां विषये प्रकाशितैः समाचारैः भारतीयाः उद्वेलिताः शासनं प्रति च कुपिताः जायन्ते स्म। १९३१तमेसवीये वर्षे मार्च-मासे शासकैर्घोषितं, यद् भगतसिंह-राजगुरु-सुखदेवाः पाशबन्धेन मृत्युदण्डं लप्स्यन्ते, तदा समस्तं भारतं स्तब्धम् अश्रु-परिप्लुत-नयनं च जातम्। मृत्यु-समये एतैः सोल्लासम् उच्चैः गीतम्—

दिल से निकलेगी न मर कर भी वतन की उल्फ़त,
मेरी मिट्टी से खुशबू-ए-वतन आएगी।

(मृत्वाऽपि देशं प्रत्यनुरक्तिः न यास्यति हृदयान्मम
मम मृदः अपि राष्ट्रिय-सौरभम् आगमिष्यति।)

(४) उपर्युक्त-घटनायाः पूर्वं १९२४तमेसवीये वर्षे कालिकाता-नगरे गोपीनाथसाहा-महोदयेन चार्ल्स टेगार्ड-नाम्नः कुख्यातस्य आरक्षि-आयुक्तस्य (पुलिस-कमिश्नर) बध-प्रयासे भ्रान्ति-वशात् एकस्य 'डे'-नाम्नः आंग्लस्य वधः कृत। तदा शासनेन अनेके क्रान्तिकारिणः कारासु क्षिप्ताः। एषु सुभाषचन्द्र-वसुः अपि एकतमः आसीत्। तस्य कारादण्डं विज्ञाय भारतीय-जनता भृशम् उद्वेजिता अभवत्।

(५) १९३०तमेसवीयेवर्षे बंगप्रदेशस्य चटगांवनगरे सूर्यसेन-गणेशघोष-लोकीनाथबाडल-आदिभिः क्रान्तिकारिभिः पुलिस-शस्त्रागारः अधिकृतः। तदा ते सर्वे पलाय्य निकटवर्तिषु लघुगिरिषु निलीनाः जाताः। ब्रिटिश-सैनिकाः तान् लघुगिरौ परिवेष्टितवन्तः। द्वयोः

दलयोः संघर्षे ८०-सैनिकाः, १२-क्रान्तिकारिणः निहताः अभवन्। १९३३तमेसवीये वर्षे सूर्यसेनः पाशबन्धेन मृत्युं प्रापितः। तस्य सहयोगिनश्च चिराय कारादुःखानि सेहिरे।

(६) इत्थं तेषु दिवसेषु क्रान्तिकारिभिः बंगप्रान्तस्य मिदनापुर-जनपदे त्रयः आंग्ल-न्यायाधीशाः द्वौ पुरपाल-निरीक्षकौ च निहताः अभूवन्।

शासनेन प्रखरा दमनक्रिया प्रारब्धा। पुरपालैः चटगांवे अनेके ग्रामाः भस्मसात् कृताः। ग्रामीणेभ्यः प्रभूतं शुल्कम् अधिगृहीतम्। १९३३तमेसवीये वर्षे जवाहरलाल-नेहरूः वर्ष-द्वयाय कारायां क्षिप्तः अभवत् यतः तेन कालिकाता-नगरे एकस्यां जनसभायां पुलिस-कृत-दमनस्य निन्दा, आतंकवादस्य च भर्त्सना कृता आसीत्।

(७) अस्मिन् स्वाधीनता-संघर्षे अनेकाः महिला-क्रान्तिकारिण्यः अपि स्वीयं सहयोगम् ददुः। ताभिः क्रान्तिकारिभ्यः शरणं प्रदत्तम्। तेभ्यः सन्देशाः प्रापिताः। प्रीतिलता-वाडेदार-नामक-महिलया तु चटगांवस्य 'पहाड़तली' नामकग्रामस्य रेलवे-संस्थानस्य अवस्कन्दनं कृतम्। तस्मिन् अवस्कन्दने सा वीरांगना प्राणानाम् आहुतिं ददौ। शान्तिघोष-सुनीतिचौधरी-नामभ्यां महिलाभ्यां गोलिका-प्रहारेण एकः जन-पदाधिकारी निहतः।

वीनादास-नाम्न्या वीरांगनया दीक्षान्त-समारोहे उपाधि-ग्रहणसमये प्रान्ताध्यक्षः (गवर्नर) गोलिकया प्रहतः। कल्पनादत्त (जोशी) सूर्यसेनेन सह कारावन्धनं सेहे।

(८) चटगांवस्य निकटवर्ति-ग्रामाणाम् अनेके मुस्लिमाः क्रान्तिपथ-पथिका आसन्। मीर-अहमद-सत्तारः फकीर-अहमद-मियां, तुनू-मियां-आदिकानां सहयोगः अविस्मरणीयः एव।

(९) शासनस्य प्रखर-दमन-नीति-हेतोः क्रान्तिकारिणाम् आन्दोलनं शनैः शनैः मन्दं जातम्। १९३१तमेसवीये वर्षे फरवरी-मासे प्रयागनगरे पुरपालैः सह संघर्षे वीरमौलिमणिः चन्द्रशेखर-आजादः वीरगतिं लब्धवान्। वीरधौरेये तस्मिन् मृत्युवशं गते पंजाब-उत्तरप्रदेश-बिहार-प्रान्तेषु आन्दोलनं श्लथतां गतम्।

सूर्यसेनस्य बलिदानेन बंगप्रान्ते अपि ईदृशी स्थितिः जाता। परं क्रान्तिवीराणां देशानुरागेण, शौर्यगाथाभिः बलिदानैश्च भारतीय जनतायां स्वराज्याभिलाषः राष्ट्रियचेतना च उत्तरोत्तरम् अवर्धेताम्।

[१२]


सम्प्रति सविनयम् अवज्ञा-आन्दोलनस्य चर्चा प्रस्तूयते–

अहिंसा-शान्तिपरकस्य एतस्य आन्दोलनस्य प्रारम्भः १९३०-तमेसवीये वर्षे जातः। एतदन्तर्गते लवण-करस्य अदानकार्यक्रमः अपि आसीत्। महात्मगान्धिना लवण-करस्य अदेयता-सम्बन्धे दीर्घा दाण्डीयात्रा कृता। आसीत्।



(चक्रवर्ती राजगोपालाचार्य:)

तंजौर-नगरे **चक्रवर्ति-राजगोपालाचारिणा** लवणयात्रा कृता। समग्रे देशे सत्याग्रहिभि: ग्रामे ग्रामे भ्रान्त्वा एतद्-विषये प्रचार: विहित:। लवणाधिनियमस्य अवज्ञा-कारणात् जवाहरलाल-नेहरू: बन्दीकृत:। एतेन जनतायां विद्रोह: उग्रतां यात:। मद्रास-कालिकाता-कराची-नगरेषु असंख्यै उत्तेजितै: लोकै: प्रदर्शनानि कृतानि। पश्चिमोत्तर-प्रान्तस्य पेशावर-नगरे ख़ान-अब्दुल-गफ़्फ़ारस्य नेतृत्वे ख़ुदाई-ख़िदमतगार (भगवदीय स्वयंसेवक)-नाम्न्या संस्थया अस्मिन् आन्दोलने अभूतपूर्व कार्यं कृतम्। एतै: शान्तिपूर्णै: प्रदर्शनै: विस्मितेन ब्रिटिश-शानेन प्रथमं तु दमनं निरुद्धम्, पश्चात् महात्मा गान्धी कारां प्रेषित:। एतेन जनतायाम् अत्यधिक: रोष: समुद्भूत:।



(ख़ान-अब्दुलग़फ़्फ़ार खाँ)

मुम्बई-नगरे विशालेन जनसमूहेन घोरं प्रदर्शनं कृतम्। अस्मिन् जनसमवाये रेलवे-श्रमिकाः, तूल-शिल्पालयानां (सूती मिल) श्रमिकाः भूयस्यां संख्यायां सम्मिलिताः बभूवुः। शोलापुर-नगरे उग्रेण जनसमूहेन 'सूती-मिल'-श्रमिकैः च मदिरा-विपण्यः विशेषतः भस्मसात् कृताः। शासनाधीन-प्रतिष्ठानानि यथा—रेलवेस्टेशनानि, नगरपालिका-भवनानि अधिग्रहीतुं प्रयासाः कृताः। एकस्मिन् ग्रामे तु तैः समानान्तरः एव सर्वकारः स्थापितः। आंग्ल-शासनेन तदा सेना-नियमः (मार्शल ला) प्रवर्तितः। सर्वाधिकम् उग्रं प्रदर्शनं कृतम् आसीत् असंख्यैः अहिंसावादिभिः सत्याग्रहिभिः सरोजिनी-नायडू नेतृत्वे धरासना-नाम्नः लवण-शिल्पालयस्य अधिग्रहणाय। पुरपालाः जनदलस्य सदस्यानाम् उपरि लौहमुष्टिकावद्भिः लगुडैः तावत् प्रहारान् कृतवन्तः, यावद् अनेके क्षतविग्रहाः न संजाताः।



(श्रीमती सरोजनी-नायडू:)

अन्ये सत्याग्रहिण: तान् सुरक्षितेषु स्थानेषु नीतवन्त:। एकस्य दलस्य सदस्येषु क्षतदेहेषु जातेषु तत्स्थाने अन्यत् दलं तत्र समायाति स्म। एवम् अनेकानि दलानि समायातानि, लगुड-प्रहार-वृष्टिभि: च भू-लुठितानि जातानि।

आंग्लानां क्रूरताया: सत्याग्रहिणां सहिष्णुताया: च तादृशं निदर्शनं विश्वस्य सुदीर्घे इतिहासे अनुपलभ्यम् एव। एतादृशम् अमानुषिकं दण्डं सोढ्वाऽपि सामान्य-जनेषु स्वाधीनतायै उत्तरोत्तरं बलवती भावना जागर्ति स्म।

अत्रान्तरे साइमन-आयोगेन-निर्दिष्ट-संशोधनेषु विचारार्थं १९३०-तमेसवीये वर्षे नवम्बर-मासे ब्रिटिश-सर्वकारेण प्रथमं 'गोलमेज़'-नामकं सम्मेलनं लण्डन-नगरे समायोजितम्। देश-स्वतन्त्रतायै संघर्षरतेन

कांग्रेसदलेन तु एतस्य सम्मेलनस्य बहिष्कार: कृत:, परं भारतीय-देशीय-राज्यानां मुस्लिम-लीग-दलस्य, हिन्दूमहासभा-दलस्य इतर-संघटनानां च प्रतिनिधय: एतस्मिन् सम्मिलिता: अभवन्।

ब्रिटिश-सर्वकार: वेत्ति स्म यत् सामान्या: भारतीयजना: कांग्रेसदलस्य अनुमतिं विना किमपि संविधानात्मकं परिवर्तनं संशोधनं वा न स्वीकरिष्यन्ति। अत: तत्कालीन-वायसराय-इरविन-महोदयेन आयोज्यमाने १९३१तमेसवीये वर्षे द्वितीय-गोलमेज़-सम्मेलने कांग्रेसदलेन सहवार्तां कर्तुं प्रयास: कृत:।

महात्मगान्धि-इरविनमहोदययो: मध्ये १९३१तमेसवीये वर्षे, मार्च-मासे अनुबन्ध: जात:। एतदनुसारं सर्वकारेण स्वीकृतं यत् सर्वे ते राजनैतिक-बन्दिन: मुक्ता: भविष्यन्ति, येषु हिंसाया: आरोप: न आसीत्। उपयोगार्थं लवण-निर्माणाधिकार: तत्र स्वीकृत:। विदेशि-वस्त्राणां मदिराया: आपणेषु साग्रहम् उपवेशस्य (धरना) अधिकार: अपि स्वीकृत: अभवत्। राजनैतिक-बन्दिनां विमुक्तौ सामान्य-जनता प्रसन्ना आसीत्। परम् अनेके राष्ट्रिय-नेतार: अनेन अनुबन्धेन सन्तुष्टा: न आसन्। परं, वल्लभभाई-पटेलस्य अध्यक्षतायां कराची-नगरे सम्पन्ने कांग्रेसाधिवेशने उपर्युक्त: अनुबन्ध: स्वीकृत: जात:। सम्मेलने भागं ग्रहीतुं च गान्धिमहोदय: प्रतिनिधि-रूपेण चयनित: अभवत्।

कराची-अधिवेशने, अनेके महत्त्वपूर्णा: प्रस्तावा: पारिता: अभवन्। तदनुसारं जनता जाति-धर्मयो: भेदभावं विना अनेकान् मौलिकाधिकारान् प्राप्स्यति।

तस्मिन् एव अधिवेशने देशस्य आर्थिक-सामाजिक-समस्याः अधिकृत्य राष्ट्रिय-आन्दोलनस्य नीतिः निर्धारिता जाता। एतस्मिन् प्रस्तावे कतिपयोद्योगानां राष्ट्रियकरणाय भारतीयोद्योगानां च विकासाय उल्लेखनम् आसीत्। श्रमिकाणां कृषकाणां च समुन्नतये अनेकाः कल्याणकारिण्यः योजनाः स्वीकृताः जाताः। एतेन प्रस्तावेन लक्ष्यते स्म, यद् राष्ट्रिय-आन्दोलने समाजवादि-विचारधारायाः वृद्धिशीलः प्रभावः आसीत्।

१९३१तमेसवीये वर्षे सितम्बर-मासे सम्पन्ने **गोलमेज़-सम्मेलने** महात्मा गान्धी, भारतीय-देशि-राजानः, हिन्दू-मुस्लिम-सिक्ख-धर्माणां नेतारश्च सम्मिलिताः बभूवुः। गान्धिमहाभागेन सम्मेलनस्य प्रतिनिधित्वं कृतम्। अन्यैः नेतृभिः तत्र स्व-स्व-समुदायस्य वर्गस्य वा प्रातिनिध्यं विहितम्। गान्धिमहोदयं विहाय अन्येषां नेतॄणां भारतस्य स्वतन्त्रता-प्राप्तये नासीत् काचिद् रुचिः। अतः गान्धिमहोदयस्य प्रबलाभिभाषकत्वे अपि स्वतन्त्रतायाः विषये कोऽपि अनुबन्धः न जातः। एवम् गोलमेज़-सम्मेलनम् असफलं-जातम्। महात्मागान्धी भारतं प्रत्यागच्छत्।

तदनन्तरं सविनय-अवज्ञा-आन्दोलनस्य पुनः प्रवर्तनम् अभूत्। शासनस्य दमनचक्रं पूर्वापेक्षया तीव्रं जातम्। गान्धिना सह अन्ये नेतारः बन्दीकृताः। इदं खेदकरं तथ्यम् यत् एकस्मिन् एव वर्षे १२००००-जनाः कारादण्डं लेभिरे।

एतद् आन्दोलनं १९३४तमेसवीये वर्षे मई-मासे प्रतिनिवर्तितम् जातम्। १९३५तमेसवीये वर्षे ब्रिटिश-शासनेन भारत-सर्वकार-अधिनियमः उद्घोषितः। तत्र कथितम् आसीत्, यद् भारतं संघराज्यं

भवेत्, परम् अस्मिन् ५०-प्रतिशतं देशि-राज्यानि सम्मिलितानि भविष्यन्ति। प्रान्तीय-स्वतन्त्रता अपि स्वीकृता जाता। परम् कांग्रेसेन एष: अधिनियम: निराशा-जनक: घोषित:, यत: आर्थिकी राजनैतिकी च शक्ति: ब्रिटिश-शासनाधीना आसीत्। केवलं १४-प्रतिशतं जना: मताधिकारिण: आसन्। एतदधिनियमानुसारं गवर्नर-जनरलस्य नियुक्ते: अधिकार: ब्रिटिश-सर्वकारस्य आधीन: आसीत्। संघीयपक्षं विहाय कांग्रेसेन प्रान्तीयपक्ष: स्वीकृत:। प्रान्तीय-निर्वाचनेषु भागग्रहणं स्वीकृतम्। १९३६- तमेसवीये वर्षे जवाहरलाल-नेहरू-महोदयस्य अध्यक्षतायां सम्पन्ने कांग्रेसाधिवेशने १९३५-अधिनियम: अस्वीकृत: जात:।

१९३७तमेसवीये वर्षे फ़रवरी-मासे सम्पन्नेषु प्रान्तीय-निर्वाचनेषु कांग्रेस: अत्यधिकै: मतै: विजयं लब्धवान्। १९३६तमेसवीये वर्षे जुलाई-मासे एकादश-प्रान्तानां मध्ये सप्तप्रान्तेषु कांग्रेस-मन्त्रिमण्डलानि स्थापितानि अभवन्। कालान्तरे इतरस्मिन् प्रान्तद्वयेऽपि कांग्रेसस्य सहभागितया सर्वकारौ स्थापितौ जातौ। इत्थं केवलं बंगाल-पंजाबप्रान्तयो: कांग्रेसेतर-मन्त्रिमण्डले आस्ताम्। पंजाबप्रान्ते यूनियनिस्ट-नामदलस्य सर्वकार: आसीत्। बंगालप्रान्ते च 'कृषक-प्रजापार्टी'-नामदलस्य मुस्लिम-लीगस्य च सम्मिलित: सर्वकार: अभूत्। एतेन स्पष्टं जातं यत् मुस्लिम-जनादेश: कांग्रेसदलस्य पक्षे जात:। आंग्लानां नीति: आसीत् यद् भारतीयेषु परस्परं विद्वेष: प्रसरेत्, अत: शासकै: मुस्लिमानां, कालान्तरे च सिक्खानां कृते पृथक् निर्वाचनस्य व्यवस्था कृता। परं कांग्रेस: निराकृत-धर्मजाति-भेदं भारतीयानां प्रतिनिधि-संघटनम् आसीत्। अस्मिन् संघटने अनेके मुस्लिम-नेतार: समवेता: अभवन्। उपर्युक्त-निर्वाचने

कांग्रेसस्य विनयेन एतत् स्पष्टीभवति यत् मुस्लिमलीगः मुस्लिम-जनतायाः एकमात्रं प्रतिनिधि-संघटनं न आसीत्, यतः एतेन चतुर्थांशाद् अपि न्यूनः जनादेशः प्राप्तः आसीत्। इत्थं हिन्दूसाम्प्रदायिक-दलैः अपि न लब्धः अधिकः जनादेशः।

कांग्रेस-मन्त्रिभिः सामान्य-जनतायाः दशाम् उन्नेतुं निःसन्देहम् अनेके प्रयासाः कृताः। सर्वप्रथमं तैः स्ववेतनं ५००-रूप्यकाणि निर्धारितम्। प्रायः ते द्वितीय-तृतीय-श्रेणीषु रेलयात्रां कुर्वन्ति स्म। मुद्रणयन्त्रे (प्रेस) नागरिक-स्वतन्त्रता प्रवर्धिता। अतिवादि-संघटनेषु लग्नाः प्रतिबन्धाः निराकृताः। पुरपालस्य (पुलिसस्य)अधिकाराः न्यूनीकृताः। अधिसंख्याः राजनैतिक-बन्दिनः विमुक्ताः। श्रमिकाणां वेतनं प्रवर्धितम्। कतिपय-क्षेत्रेषु मदिरापानं निषिद्धम्। हरिजनानां कल्याणाय कार्यं कृतम्। ग्रामीणोद्योगाः समर्थिताः। उच्चशिक्षायाः 'तकनीकी'-शिक्षायाः च प्रसाराय अनेके उपायाः कृताः। साम्प्रदायिकोपद्रवाणां प्रतिरोधाय कठोरदण्डस्य व्यवस्था कृता। सामान्यजनता स्वशासनस्य सुखम् अनुभवति स्म, एषा आसीत् महती उपलब्धिः। कारासु क्षिप्ताः जनाः साम्प्रतं मन्त्रिणः आसन्।

एतद् उल्लेखनीयम् अत्र यत् जवाहरलालनेहरूः सुभाषचन्द्रबोस-सदृशाः कतिपये नेतारः कांग्रेस-मन्त्रिमण्डलस्य निर्माणे विरोधिनः आसन्। प्रायः समग्रदेशे कृषकाणां श्रमिकाणां च संघटनानां प्रभावः वर्धमानः आसीत्। आचार्यनरेन्द्रदेव-सदृशनेतॄणां मार्गदर्शने 'कांग्रेस-सोशलिस्टपार्टी'-नामकं दलं सुदृढं जातम्। कम्युनिस्ट-पार्टी नामकस्यः दलस्य प्रभावः अपि वर्धिष्णुः आसीत्। इत्थं ये नेतारः ब्रिटिश-सर्वकारेण सह शान्ति-

सन्धये समुत्सुका: आसन्, तेषां प्रभाव: उत्तरोत्तरम् अवर्धत। एते नेतार: पूर्ण-स्वतन्त्रतां वांछन्ति स्म। अत: आन्दोलनाय तत्परा अवर्तन्त।

[१३]


परं क्रांग्रेसे एव विनम्र-दलीया: नेतार: त्वरितान्दोलनस्य पक्षे न आसन्। १९३८तमेसवीये वर्षे सुभाषचन्द्रबोस: कांग्रेसस्य अध्यक्ष: जात:। १९३९तमेसवीये वर्षे असौ महात्मगान्धिन: विरोधाय कांग्रेसाध्यक्ष-पदनिर्वाचने संघर्षम् अकार्षीत् विजयं च लेभे। परं सद्य: एव असौ कांग्रेसस्य अध्यक्ष-पदं त्यक्त्वा 'फारवर्ड-ब्लाक'-दलं स्थापितवान्।

१९३९तमेसवीये वर्षे सितम्बरमासे द्वितीयं विश्वयुद्धम् आरभत। एतस्य प्रभाव: भारतस्य स्वतन्त्रता-प्राप्त्यै सहायक: जात:। हिटलरस्य सेना पोलैण्ड-देशम् आक्रान्तवती। युद्धे आरब्धे ब्रिटिशसर्वकार: भारतस्य जनताम् अपृष्ट्वा एव भारतं युद्धे न्ययोजयत्।

उल्लेखनीयम् अत्र यद् अस्माकं राष्ट्रवादिन: नेतार: युद्धाभिलाषुकाणां नृशंसानाम् अधिकारिणां (फासिस्ट) विरोधिन: आसन्। तै: अनेकश: उक्तम् आसीत् यत् साम्राज्य-वादिन: युद्ध-प्रेमिणश्च विश्व-शान्ते: विश्व-प्रगते: च शत्रव: सन्ति। अत: युद्धे आरब्धे भारतीयेन राष्ट्रियान्दोलनेन फ़ासिस्ट-देशा: अतीव निन्दिता:।

एतत् सत्यम् आसीत् यत् फ़ासिस्ट-देशा: ब्रिटेनस्य विरोधे तेन सह युद्धरता: आसन्। किन्तु भारतीया जनता जानाति स्म, यत् फ़ासिस्ट-देशा: भारतस्य हितैषिण: न सन्ति। यदि युद्धे ते विजयन्ते

तदा कोऽपि देश: सुरक्षित: न भविष्यति। अत एव कांग्रेसस्य प्राथमिकता आसीत् यत् शीघ्रम् एव राष्ट्रियसर्वकार: प्रतिष्ठाप्येत, ब्रिटेन: च प्रतिजानातु यत् युद्ध-समाप्तौ भारतं स्वतन्त्रं भविष्यति। परं ब्रिटिश-शासकै: तेषाम् अनुरोध: निराकृत:। ब्रिटिश सर्वकार: वस्तुत: निजं साम्राज्यवादि-लक्ष्यं प्राप्तुं युद्धसंलग्न: आसीत्। अत: युद्धानले भारतस्य प्रक्षेपणं निरोद्धुं विभिन्न-प्रान्तेषु निर्मित-मन्त्रिमण्डलै: १९३९तमेसवीये वर्षे नवम्बरमासे त्यागपत्राणि दत्तानि। सामान्यजनै: कर्मविराममाध्यमेन विरोध: प्रदर्शित:, प्रदर्शनानि च आयोजितानि।



(मौलाना अब्बुल-कलाम: आज़ाद:)

१९४०तमेसवीये वर्षे मार्च-मासे कांग्रेसस्य अधिवेशनं मौलाना **अब्बुलकलाम-आज़ादस्य** अध्यक्षत्वे रामगढ़नगरे सम्पन्नम् अभवत्।

तस्मिन् अधिवेशने कांग्रेस: पूर्ण-स्वतन्त्रताया: प्रेप्सां कृतवान्, निर्णीतवान् च यद् एतदर्थम् असौ सविनयम् अवज्ञा-आन्दोलनं प्रारप्स्यते।

१९४०तमेसवीये वर्षे अक्टूबर-मासे कांग्रेसेन व्यक्तिगत: सत्याग्रह: आरब्ध:। एतस्य आशय: आसीत् यत् कांग्रेसेन चयनिता: सत्याग्रहिण: एकैकश: सार्वजनिक-स्थानेषु गत्वा युद्धस्य विरोधे भाषिष्यन्ते स्वयं च आत्मानं काराबन्धाय अर्पयिष्यन्ति। एतदर्थं चयनित: प्रथम: सत्याग्रही बिनोवा-भावे आसीत्। अल्पेन एव कालेन २५ सहस्राणि सत्याग्रहिण: बन्धनाय आत्मानं समर्पितवन्त:। एतेषु सत्याग्रहिषु मद्रास-राज्यस्य मुख्यमन्त्री राजगोपालाचारी अपि आसीत्। बिहारराज्यस्य मुख्यमन्त्री श्रीकृष्ण-सिन्हा, महाराष्ट्र-कांग्रेसस्य अध्यक्ष: जी.बी. गाडगिल:, सरोजिनी-नायडू, जी.बी. मावलंकर:, अरुणा-आसफअली-सदृशा: प्रमुखा: नेतार: आसन्।

[१४]

अत्रान्तरे विश्वस्य रंगमंचे अनेका: घटना: घटिता:। १९४१-तमेसवीये वर्षे जूनमासे जर्मनीदेशेन रूसदेशे आक्रमणं कृतम्। १९४१-तमेसवीये वर्षे दिसम्बरमासे जापानेन अमेरिका-देशस्य 'पर्लहार्बर'-इत्याख्यं नौसेना-आस्थानम् आक्रान्तम्। अथ च जापानदेशेन फिलीपीन-हिन्दचीन-इंडोनेशिया-मलाया-बर्मा-देशेषु अधिकार: कृत:। १९४२-तमेसवीये वर्षे मार्च-मासे च रंगून-नगरम् अधिकृतम्। एतेन साम्प्रतं युद्धविभीषिका भारतस्य सीमाया: समीपे अविद्यत। भारतस्य नेतार: युद्धम् अनिन्दन् अवदन् च, "यदि ब्रिटेन: स्वप्रभाव-शक्तिं भारतीयेभ्य:

अर्पयति, युद्ध-समाप्तौ च भारतस्य पूर्ण-स्वतन्त्रतायै वचनबद्धः जायते, तदा ते भारतस्य रक्षायै मित्रराष्ट्राणां च हिताय सहयोगं प्रदास्यन्ति।''

भारतस्य सहयोगं प्राप्तुकामः ब्रिटेनः सर-स्टैफोर्ड-क्रिप्सस्य नेतृत्वे १९४२तमेसवीये वर्षे मार्च-मासे प्रतिनिधिमण्डलं (मिशन) भारते प्रेषयत्। परम् एषा वार्ता अप्रैलमासे असफला जाता। असफलतायाः प्रमुखं कारणम् आसीत् यद् ब्रिटिश-शासकाः वास्तविक-राष्ट्रिय-सर्वकारस्य स्थापनां स्वीकर्तुम् उद्यताः न आसन्। तैः संविधान-सभायाः प्रेप्सा स्वीकृता, देशि-राज्यानाम् हितानि संरक्षितुम् उन्नेतुं प्रयासः कृतः। परम् एतस्यां सभायां राजभिः मनोनीता एव प्रतिनिधयः सम्मिलिताः भविष्यन्ति। देशि-राज्यानां जनतायाः प्रतिनिधित्वं तत्र न भविष्यति।

'क्रिप्स-मिशन'-इत्याख्य प्रतिनिधिमण्डलस्य असफलतायाः चतुर्मासावधौ एव भारतीय-जनतया तृतीयः महान् संघर्षः प्रारभत। एष संघर्षः 'भारतं त्यजत' इति नाम्ना ख्यातः अस्ति।

८-८-१९४२तम-दिनांके अखिलभारतीय-कांग्रेस-समितिः मुम्बईनगरे एकस्य प्रस्तावस्य माध्यमेन एतद् घोषितवती यद् भारते ब्रिटिशशासनं यथाशीघ्रं समाप्तिम् आनीयेत। फासिस्ट-देशानां जापानेदशस्य च विरुद्धे युद्धाभियाने युद्धकर्तृभ्यः मित्रराष्ट्रेभ्यः अपि एतद् आवश्यकम् अस्ति यद् भारताद् ब्रिटिशसत्ता निराकृता भवेत्, भारतदेशः च यथाशीघ्रं स्वाधीनः जायेत। स्वतन्त्रता-प्राप्त्यनन्तरं भारतं स्वैः सकलैः साधनैः सह मित्रराष्ट्रैः साकं युद्धे सम्मिलितं भविष्यति, यानि अधुना फासिस्ट-देशानां साम्राज्यवादि-देशानां च विरुद्धे युद्धरतानि सन्ति। इत्थम् एतेन प्रस्तावेन

व्यापकम् अहिंसात्मकं च आन्दोलनम् स्वीकृतम् अभवत्। प्रस्तावे पारिते जाते महात्मगान्धिना उद्घोषितं यद् एतस्मै आन्दोलनाय एष मे संक्षिप्त: मन्त्र:, "कार्यं वा साध्येत मरणं वा व्रियेत (करो या मरो)।"


'भारतं त्यजत' इत्याख्ये विराट्-आन्दोलने सामान्यजनानां कृते एतौ आस्तां द्वौ रणनादौ-

"कार्यं वा साध्येत मरणं वा व्रियेत।"

"भारतं त्यजत, भारतं त्यजत।"

परन्तु ९-८-१९४२तमे दिनांके प्रभाते एव ब्रिटिश-सर्वकारेण महात्मा गान्धी अन्ये च नेतार: निगृह्य अज्ञातस्थानं नीता:। एतस्य विरोधे सामान्यजनै: प्रखरं जनान्दोलनं प्रारब्धम्। समग्र-देशे विद्यालयेषु, शिल्पशालासु आपणेषु सर्वत्र कार्यम् अवरुद्धं जातम्। कर्मविराम: प्रासरत्। कर्मविरामं दमयितुं पुरपालै: दण्ड-गुलिका-प्रहाराणाम् आश्रय: गृहीत:। उत्तेजित: जनसमूह: पुलिस-स्थानानि, पत्रालयान्, रेलवे स्टेशनानि आक्रान्तवान्। तै: दूरभाषस्य सम्पर्क सूत्राणि छिन्नानि, रेलवे-दण्डा:, तारयन्त्राणां स्तम्भा: च उत्पाटिता:। ब्रिटिश-शासकै: पूर्वतोऽप्यधिक: आन्दोलनकर्तृभि: साकं नृशंसता-पर: व्यवहार: कृत:। प्राय: षष्टि-सहस्राणि जना: कारासु क्षिप्ता:। दशसहस्राणि जना: गोलिकादि-प्रहारै: काल-कवलिता: जाता:। समाचार-पत्रेषु अंकुश: नियोजित:।

महायुद्ध-काले बंगाल-प्रदेशे भीषण-दुर्भिक्ष-पीडिता: त्रिंशत् लक्षाणि जना: मृत्युमुखं प्रविष्टा:। सर्वकारेण दुर्भिक्षार्तानां बुभुक्षा-कष्ट-निवारणाय विशेषा रुचि: न प्रदर्शिता। सत्यं कथयन्ति नीतिकारा: यत् "क्षते प्रहारा: निपतन्त्यभीक्ष्णम्"।



(आज़ादहिन्द फ़ौज)

[१५]

आज़ादहिन्द फ़ौज (स्वतन्त्र-भारत-सैन्यम्)

महायुद्ध-दिवसेषु एव १९४२तमेशवीये वर्षे मार्चमासे सुभाषचन्द्रवसुः गुप्तरूपेण भारतात् निर्गत्य रूस-देशं प्राप्तः। असौ रूस-देशाधिकारिभ्यः भारतस्य स्वतन्त्रतायै साहाय्यं ग्रहीतुं समुत्सुकः आसीत्, परं तेषु दिवसेषु एव जर्मनीदेशेन रूसदेशः आक्रान्तः। आत्मानं रक्षितुं रूसदेशः मित्रराष्ट्रेषु सम्मिलितः जातः। अतः कार्य-सिद्ध्यर्थं सुभाषचन्द्रः जर्मनीं गतः। तत्र आश्वासनं प्राप्य जापानदेशं प्राप्तः। अस्मिन् देशे कतिपय-वर्ष-पूर्वं गतः रासबिहारीबोसः प्रतिवसति स्म।

तेन दक्षिण-पूर्व-एशिया क्षेत्रे निवसतां भारतीयानां सहयोगेन 'इण्डियन-इण्डिपेडेंस-लीग' (भारतीय-स्वतन्त्रता-संघ:) स्थापित : आसीत्। युद्धकाले जापानदेश: ब्रिटिशसेनाया: कतिपयसहस्राणि भारतीय-सैनिकान् बन्दिन: अकरोत्। उपर्युक्त लीगेन भारतस्य स्वतन्त्रतायै जनरल-मोहनसिंहस्य नेतृत्वे भारतीय-युद्ध-बन्दिनाम् एका आज़ादहिन्द-सेना संघटिता आसीत्।



(सुभाषचन्द्र: बोस:)

सुभाषबोस: जापानदेशम् आगत्य अस्या: सेनाया: नेतृत्वं स्वयं गृहीतवान्। असौ जापानदेशेन मिलित्वा अनया सेनया भारतं स्वतन्त्रं कर्तुम् ऐच्छत्। अस्यां सेनायां प्राय: सहस्राणि सैनिका: आसन्। अस्या: सेनाया: अधिकारिण: सैनिका: राष्ट्रभक्ति-भावना- सम्भरिता: अवर्तन्त।

ते सुभाषबोसम् स्नेहेन समादर-भावनया च 'नेताजी'-पदेन सम्बोधयन्ति स्म। सुभाषबोसेन २१-१०-१९४२तम-दिनांके सिंगापुरे स्वाधीन-भारतस्य सर्वकार: स्थापित:। जर्मनी-जापानदेशाभ्याम् एतयो: समर्थकै: देशैश्च एष सर्वकार: प्रमाणीकृत:। ६-७-१९४४तमे दिनांके सुभाषबोस: 'आजाद- हिन्द- रेडियो'- अभिधेन आकाशवाणी माध्यमेन महात्मगान्धिनं सम्बोधितवान्, ''राष्ट्रपित:! भारतस्य स्वाधीनताया: अन्तिमं युद्धम् आरब्धम्। भारतस्य स्वतन्त्रतायै अस्मिन् पावने युद्धे वयं भवत: आशीर्वादान् शुभकामनाश्च वांछाम:।''

एषु दिनेषु सुभाषबोस: जापानेन अधिकृतेषु अंडेमान-द्वीपेषु जगाम। भारतस्य ध्वजं च तत्र उत्तोलितवान्। भारतस्य पूर्वोत्तरभागे कृते आक्रमणे 'आज़ाद-हिन्द-फ़ौजस्य' सैन्य-दल-त्रयं सहयोगं प्रादात्। एतस्य आक्रमणस्य उद्देश्यम् आसीद्—आंग्लानां भारतात् निष्कासनम्। एतस्य सेनाखण्डस्य प्रमुख: अधिकारी आसीत्—शाह-नवाज़-खान:। भारतदेशे प्रविश्य एष महानुभाव: भूमौ शयित्वा मातृभूमे: पवित्रं रज: अचुम्बत्।

परं खेदविषय: अयं यत् जापानदेशे पराजिते सति भारताय स्वतन्त्रता-प्रदाने 'आज़ाद-हिन्दसेना' असफला जाता।

उल्लेखनीयम् अत्र यत् 'आज़ाद-हिन्द-सेनाया:' वीरघोष: आसीत् 'जयहिन्द' (भारतं जयतु), 'दिल्ली चलो' (दिल्लीं प्रति चलत) च।

नेताजी-सुभाषबोस: एतया सेनया दक्षिण-पूर्व-एशिया'- भूखण्डस्य सर्वान् भारतीयान् भारतस्य स्वतन्त्रतायै एकमतान् अकरोत्। भारतीय-जनता अस्या: सेनाया: शौर्येण त्यागभावेन च अति प्रभाविता आसीत्।

समग्र-देशे विविधेषु समारोहेषु भारतीयाः "नेताजी-सुभाषचन्द्र-बोस ज़िन्दाबाद, ज़िन्दाबाद' (जीवतु जीवतु), 'आज़ाद हिन्द फ़ौज जिन्दाबाद जिन्दाबाद' इति उद्घोषयन्ति स्म। एभिः घोषैः निराशा-ग्रस्ताः भारतीयाः स्वतन्त्रता-प्राप्तये नवीन-चैतन्यं लभन्ते स्म।

प्रियाः पाठकाः! श्रुतिपरम्परया एवं कथयन्ति जनाः यद् अस्माकं प्रियनेता परम-राष्ट्रभक्तः श्रीसुभाषचन्द्रबोसः टोकियो-नगरं प्रति उड्डीयमाने विमाने दुर्घटना-ग्रस्ते जाते, सर्वान् भारतीयान् स्तब्धान् विषण्णान् विलपतश्च विहाय पंचत्वम् जगाम इति।

कालान्तरे यदा ब्रिटिश-सर्वकारस्य सैनिक-न्यायालयः एतस्याः सेनायाः त्रिषु अधिकारिषु अभियोगं कृतवान् तदा समस्ते देशे सर्वकारं प्रति जनतायाः विरोधः समुद्दीपितः अभवत्। एते त्रयः अधिकारिणः आसन्-शाहनवाज़खांः, पी.के. सहगलः, गुरदयालसिंहः ढिल्लो च। भारतीय-नेतृभिः तदा 'आज़ाद-हिन्द-फ़ौज बचाव(संरक्षण)-समितिः' घटिता।

एतस्याः समित्याः सदस्याः देशस्य प्रसिद्धाः अभिभाषकाः आसन्—भूलाभाई देसाई, तेजबहादुर सप्रूः, कैलाशनाथ काटजू, आसिफ-अली च।

दिल्लीनगरस्य लालकिला-नाम्नः दुर्गस्य एकस्मिन् कक्षे अभियोग प्रक्रिया आरब्धा। समित्याः अभिभाषकैः सेनायाः अधिकारिणां विमुक्तये तर्क-वितर्कप्रवीणः वाक्पटुः अभिभाषकः चयनितः। परं न्यायालयेन ते सर्वे देशद्रोहिणः घोषिताः। एतेन निर्णयेन समग्रे भारतदेशे आंग्लान्

प्रति एतादृशी सुतीव्रा विद्रोह-भावना उद्‌बुद्धा अभवत्, यत् ब्रिटिश-सर्वकारेण ते सर्वे दण्डमुक्ता: कृता:। एतेन अत्याह्लादम् अनुभवतां भारतीयानां हृदये स्वतन्त्रताभिलाष: पूर्वतोऽप्यधिक: जागरित:।

[१६]

द्वितीयं महायुद्धं १९३९तमेसवीये वर्षे प्रवृत्तम् आसीत्, १९४४-ईसवीये च समाप्तिम् अगमत्। एतस्मिन् अन्तराले सोवियतसंघ: अमेरिका च महाशक्तिरूपेण समुदितौ अभवताम्। एतौ हि भारताय स्वतन्त्रता-प्रदान-पक्षे अवर्तेताम्। ब्रिटेन: तदा युद्ध-प्रभावात् जर्जरतां गत: आसीत्। अत्र लोकसभाया: निर्वाचने कन्ज़रवेटिव-दल: (अनुदार-दल:) पराजित: लेबर-दल: (श्रमदल:) च जितवान्। लेबर-दल: भारतस्य स्वतन्त्रताया: पक्षे आसीत् यत: एष: जानाति स्म यत् साम्प्रतं भारतीयानां दमनं—विशेषत: आजाद-हिन्द-सेनाया: अभियोगविषये तेषां प्रतिक्रियाम् अभिलक्ष्य—असम्भवम् आसीत्। तेषु एव वर्षेषु १९४६तमेसवीये वर्षे फ़रवरीमासे मुम्बईनगरे राजकीय-(रायल)-भारतीय-नौसेनाया: कतिपय-नाविकानां विद्रोह: जात:। एतस्य विद्रोहस्य दमने ३००-जना: हता:। इत्थं भारतीय-वायुसेनायां कार्यावरोध: (हड़ताल) जात:।

एतत् प्रतीयते स्म यत् न केवलं शासनतन्त्रं राष्ट्रवादि-विचारधारां प्रति उन्मुखं भवत् आसीत्, अपितु पुलिस-विभाग: अपि एतां दिशां प्रति याति स्म। एषा आशंका निर्मूला न आसीत् यत् अधुना पुलिस: विद्रोहि-भारतीयानां दमने ब्रिटिश-सर्वकारस्य अवज्ञां करिष्यति। अपि च समग्र-देशे कर्म-विरामा: प्रदर्शनानि च, उत्तरोत्तरं वर्धिष्णूनि आसन्।

सर्वाम् एतां स्थितिम् अभिलक्ष्य ब्रिटिश-सर्वकारेण भारतस्य सत्तायाः हस्तान्तरणस्य निर्णयः कृतः। एतदर्थं तेन एकः 'मन्त्रिमण्डलीय-संघः' (कैबिनेट मिशन) भारते प्रेषितः।

'मिशनस्य' योजनानुसारं संविधान-सभायां प्रान्तीय-विधान-सभाभिः चयनिताः प्रतिनिधयः भारतीय-देशि-राज्यानां शासकैः मनोनीताः च जनाः भविष्यन्ति। सुदीर्घ-विस्तृत-विचार-विमर्शानन्तरं मिशनस्य योजना कांग्रेसेन मुस्लिम-लीगेन च बहुविध-मतभेदान् अवमत्य स्वीकृता। अन्ततः, १९४६तमेसवीये वर्षे सितम्बर-मासे जवाहरलालनेहरू-महोदयस्यः नेतृत्वे एतादृशः सर्वकारः संघटितः अभवत्। १९४६तमेसवीये वर्षे अक्टूबर-मासे मुस्लिम-लीगः अपि मन्त्रिमण्डले सम्मिलितः अभवत्।

सत्तायाः हस्तान्तरणस्य व्यवस्थायै ब्रिटिश-सर्वकारेण १९४७ तमेसवीये वर्षे मार्चमासे लार्ड लुइ-माउण्टबेटनः वायसराय (उपराजा)-रूपेण भारते प्रेषितः। कांग्रेस-मुस्लिम-लीगयोः मध्ये यद्यपि घोराः मतभेदाः अजायन्त, तथापि एका सन्धियोजना प्रस्तुता अभवत्। सत्तायाः सन्धि-योजनानुसारं देशः १५-८-१९४७तम-दिनांके स्वतन्त्रः भविष्यति, परं देशस्य विभाजनम् अपि भविष्यति। यथा–

(क) देशस्य पश्चिम-दिशायां पश्चिमीय-पंजाब-सिन्ध-पश्चिमोत्तर-सीमाप्रान्त-भूखण्डः, पूर्वदिशायां पूर्वीयबंगाल-भूखण्डश्च 'पाकिस्तान'-नाम्ना स्वीकृतः भविष्यति।

(ख) तत्कालीन-भारतस्य शेषभागश्च 'हिन्दुस्तान' इति नाम्ना अभिहितः भविष्यति।

कांग्रेस: वस्तुत: देशस्य विभाजनं न वांछति स्म। परं स्वतन्त्रता-प्राप्त्यर्थं, उत्तरोत्तरं विकृतिं यान्तीं स्थितिं समाधातुं कांग्रेसेन अन्तत: विवशीभूय एव विभाजनं स्वीकृतम्।

[१७]

एतद् उल्लेख्यम् अत्र यत् १९४६तमेसवीये वर्षे बंगाल-बिहार-मुम्बई-इत्यादिषु अनेकेषु स्थलेषु साम्प्रदायिका: उपद्रवा: संजाता:, येषु सहस्रश: हिन्दव: मुस्लिमा: च हता:।

विभाजनस्य घोषणानन्तरं तु देशे विशेषत: पंजाबप्रान्ते सर्वत्र बाहुल्येन उपद्रवा अभवन्। कतिपय-मासै: एव समग्र-देशे पंचलक्षाधिका: जना: काल-कवलिता: जाता:। अनेक-लक्षाणि जना: निर्गृहा: जाता:। एतादृशं नरसंहारात्मकं मृत्यु-ताण्डवं कदाचित् क्वचित् न घटितं स्यात्।

नि:सन्दिग्धम् एतत् सर्वं आंग्ल-शासनस्य कुटिलनीते: एव परिणाम: आसीत् यत् **'विभिन्नेषु धर्मेषु जातिषु च परस्परं वैमनस्यं जनय, निर्बाधं शासनं च कुरु।'**

१५-८-१९४७तम-दिनांके रात्रौ द्वादश-वादने जवाहरलालनेहरू:-महोदय: उदघोषयत् यद् अधुना भारते जीवनस्य स्वतन्त्रतायाश्च उदय: जात:। प्रातर्वेलायां च लालकिला-नाम्न: दुर्गस्य प्रमुख-प्राचीर-मध्ये स्वतन्त्र- भारतस्य ध्वज: तेन समुत्तोलित:। यद्यपि आनन्दोल्लासस्य आसीत् स काल:, तथापि उपद्रवानले हुत-प्राणानां मानवानां स्मृति: सर्वेषां हृदयेषु अन्तर्दाहरूपेण ज्वलति स्म।

भारत-स्वतन्त्रता-संघर्षः राष्ट्रियम् आन्दोलनम् आसीत्। भारतीय-जनतां प्रभुसत्ता-सम्पन्नां कर्तुं जनतन्त्रस्य स्थापनार्थं च एष संघर्षः अक्रियत। जनतन्त्रस्य एषः अभिप्रायः यत् प्रभुसत्ता सामान्य-जनानाम् एव, तैः एव, तेभ्यः एव च।

जनतन्त्रे सर्वे नागरिकाः समानाधिकारवन्तः भवन्ति। स्वान् विचारान् भाषणेन लेखनेन च प्रकटयितुं स्वतन्त्राः भवन्ति। विश्वशान्तेः प्रवर्धनार्थम् अपि प्रजातन्त्रम् एव मूलतः सहायकं जायते।

[१८]

स्वतन्त्रता-प्राप्तेः अनन्तरम् एतद् आवश्यकम् आसीत् यद् देशः राजनैतिक-रूपेण एक एव स्यात्। अतएव भारतीय-देशि-राज्यानाम् भारते अन्तर्भावः अनिवार्यः अभवत्। सरदार-वल्लभभाई-पटेलः तदा मन्त्रिमण्डले गृहविभागस्य मन्त्रिपदे सुशोभते स्म। एतस्य महापुरुषस्य प्रयासेन राज्यत्रयं विहाय शेषाणि राज्यानि भारतदेशस्य अंगानि अभवन्।

एतानि त्रीणि राज्यानि आसन्—जम्मूकाश्मीरौ, हैदराबादः, जूनागढ़श्च। एतेषु—

(१) जूनागढ़-राज्यस्य नवाबः देशात् निर्गत्य पाकिस्तानम् अगच्छत्। एतस्य राज्यस्य जनता १९४८तमेसवीये वर्षे-फ़रवरी-मासे भारते सम्मिलितुम् अवांछत्।

(२) हैदराबादस्य निजामेन १९४८तमेसवीये वर्षे सितम्बर-मासे भारतीय-सेनां प्रति आत्मसमर्पणं कृतम्। तदनन्तरम् एतद् राज्यम् अपि भारते सम्मिलितम् जातम्।

(३) जम्मूकाश्मीरौ-नामक-राज्ये स्वतन्त्रता-प्राप्तेः अनन्तरम् एव पाकिस्तानस्य सैन्यम् आक्रमणं व्यदधात्। भारतीय-सेनया अपि प्रत्याक्रमणं कृत्वा आक्रान्तारः हताः, हतशेषाः पाकिस्तानं प्रति पलायिताः।

इत्थं लौहपुरुषस्य वल्लभभाई-पटेलस्य प्रयासेन सर्वाणि देशि-राज्यानि भारते सम्मिलितानि अभवन्।

भारतीय-स्वतन्त्रता-प्राप्तेः अनन्तरम् फ्रांसेन पुर्तगालेन च भारतभूमौ अधिकृतानाम् उपनिवेशानां स्वाधीनतार्थं भारतीयैः स्वसंघर्षः पूर्वापेक्षया प्रबलतरः कृतः। परिणामतः, फ्रांसाधीनं चन्द्रनगरं १९४९तमेसवीये वर्षे भारते सम्मिलितम्। भारत-फ्रांस-देशयोः सन्धिवशात् फ्रांसान्तर्गतानि अन्यानि क्षेत्राणि अपि भारते सम्मिलितानि अभवन्।

१९५४तमेसवीये वर्षे स्वाधीनता-सेनान्यः पुर्तगालाधीनेषु क्षेत्रेषु दादर-नागरहवेली-नामानि नगराणि विमोचितवन्तः। १९६१तमेसवीये वर्षे दिसम्बर-मासे च भारतीय-सेनया गोवानगरं विमोचितम्।

[१९]

प्रिया: पाठक-महाभागा:!

समग्र: भारतदेश: अपूर्व-त्यागै: अगणितै: बलिदानैश्च आंग्लानां पराधीनता-पाशान् छित्वा स्वतन्त्र:-जात:। देशस्य विभाजनम् अद्यापि विषदंश इव पीडयति सर्वान् सचेतस:। सम्भवत: तदा भारतीय-नेतृणां सम्मुखे अस्माद् अन्य: उपाय: नासीत्।

स्वतन्त्र-भारतस्य संविधान-निर्माण-कार्यम् अपि स्वातन्त्र्य-प्राप्ते अनुपदम् एव प्रारब्धम् जातम्। २६-११-१९४९तमे दिनांके एतत् कार्यं सम्पन्नम् अभवत्। २६-१-१९५०तमे दिनांके भारतराष्ट्रं गणतन्त्रं जातम्। तस्मिन् एव च दिवसे भारतस्य निजं संविधानम् प्रवृत्तम्।

सुधिय: पाठका:!

भवद्भि: अस्मिन् एव पुस्तके पठितं यत् २६-१-१९३०तमे दिनांके भारतं गणतन्त्ररूपेण घोषितम् आसीत् लोकप्रियेण नेत्रा जवाहरलाल-नेहरू-महोदयेन लाहौर-नगरे रावीतटे। तदा-प्रभृति एष दिवस: प्रतिवर्षं गणतन्त्र-दिवस-रूपेण ससमारोहम् अभिनन्द्यते।

देशभक्ता: पाठका:!

पुस्तकम् इदं परिशील्य गीयन्तां तानि गीतानि यानि स्वाधीनता-संघर्षे न केवलं क्रान्तिकारिणां अपितु समग्र-भारतस्य जनानां हृदयानि स्वदेश-प्रेम्णा नवीनया प्रेरणया च सम्भृतानि अकुर्वन्—

(क) विजयी विश्व तिरंगा प्यारा,
झंडा ऊँचा रहे हमारा।

(ख) सारे जहां से अच्छा हिन्दोस्तां हमारा,
हम बुलबलें हैं इसकी ये गुलसितां हमारा।

(ग) सरफ़रोशी की तमन्ना अब हमारे दिल में है,
देखना है ज़ोर कितना बाज़ुए कातिल में है।

वन्दे मातरम्

(घ) सुजलां सुफलां मलयज-शीतलां,
शस्य-श्यामलां मातरम्।

(च) जनगण मन अधिनायक जय हे!
भारत-भाग्य-विधाता!

इति सत्यदेवचौधरी-प्रणीता

भारतीय-स्वतन्त्रता-संघर्ष-गाथा

समाप्तिमगात्